JOURNAL OF MANUSCRIPT STUDIES

Vol. XXXVI

Oriental Research Institute and Manuscripts Library
University of Kerala, Kariavattom,
Thiruvananthapuram

JOURNAL OF MANUSCRIPT STUDIES

Vol. XXXVI 2003-2004

Editor
DR. P. VISALAKSHY

Joint Editor
Smt. R.GIRIJA

Oriental Research Institute and Manuscripts Library
University of Kerala, Kariavattom,
Thiruvananthapuram

Journal of Manuscript Studies

Formerly published under the title " Journal of Kerala University Oriental Research Institute and Manuscripts Library"

Edited, printed and published by Dr. P. Visalakshy, Reader in Charge, Oriental Research Institute and Manuscripts Library for the University of Kerala

Printed at : Prasanth Printers, Kazhakuttom.

Price : Rs. 25/-

Articles for publication and books (two copies each) for review may be sent to the Reader in charge of the Institute.

CONTENTS

Statement about the ownership and other particulars of the Journal of Manuscript Studies.

Form IV (See Rule 8)

Place of Publication	:	Kariavattom Thiruvananthapuram
Periodicity of Publication	:	Yearly
Printer, Publisher and Editor	:	Dr. P. Visalakshy
Nationality	:	Indian
Address	:	Reader in Charge, Oriental Research Institute and Manuscripts Library, Kariavattom
Name and address of individuals who own the newspaper and partners or Shareholders holding more than one percent of the total capital	:	University of Kerala, Thiruvananthapuram

I, Dr. P. Visalakshy hereby declare that the particulars given above are true to the best of my knowledge and belief.

Sd/-
Dr. P. Visalakshy

Kariavattom
29.1.2004

प्रक्रियासर्वस्वम् - संक्षिप्तपरिचयः

प्रो । वासुदेववेङ्कटराजशर्मा

१. उपक्रमः ।

व्याकरणं शब्दानुशासनमित्युच्यते। शब्दानुशासनं च अपशब्देभ्यो विविच्य साधूनां शब्दानां बोधनम् । तच्च प्रकृतिप्रत्यययोः योजनद्वारा साधूनां शब्दनां निष्पादनेन क्रियते। पदं च द्विविधम्, सुबन्तं तिङन्तं चेति । रामेण, रामायेत्यादौ नामपदानामन्ते दृश्यमानानां प्रत्ययानां सुप् इति संज्ञा। अस्ति भवति इत्यादौ क्रियापदानामन्ते विद्यमानानां प्रत्ययानां तिङ् इति संज्ञा । क्वचित् प्रकृतेः प्रत्ययस्य वा विकारो भवति । स च आदेशः, आगमः, लोपः , द्वित्वमिति चतुर्धा। एकस्य वर्णस्य स्थाने अपरस्य वर्णस्य उच्चारणम् आदेशः । विद्यमानस्य पूर्वं परं वा अपरस्य वर्णस्य योजनम् आगमः । धात्वादिषु पठितस्य वर्णस्य क्वचिददर्शनं लोपः । एकस्यैव वर्णस्य द्विरुच्चारणं द्वित्वम् । एतेषां विधायकानि वाक्यानि व्याकरणशास्त्रे सूत्राणीत्युच्यन्ते। पाणिनीयव्याकरणे ३९८१ सूत्राणि वर्तन्ते । सूत्रेषु क्रियापदं नैव प्रयुज्यते । भवतीति स्यादिति वा अध्याहृत्य व्याख्येयम् । पाणिनिना सूत्राणि एवंक्रमेण पठितानि यथा पूर्वपूर्वसूत्रे विद्यमानानि पदानि उत्तरोत्तरसूत्रे स्वीकर्तुं शक्यन्ते, येन तेषां पुनः पुनरुच्चारणं परिह्रियते । यथा अतो भिस ऐस्, बहुलं छन्दसि, नेदमदसोरकोः टाङसिङसामिनात्स्याः, ङेर्यः, सर्वनाम्नः स्मै, ङसिङ्योः स्मात्स्मिनौ, पूर्वादिभ्यो नवभ्यो वा, जसः शी, औङ आपः, नपुंसकाच्च, जश्शसोः शिः, अष्टाभ्य औश्, षड्भ्यो लुक्, स्वमोर्नपुंसकात्, अतोऽम्, अद्ड्डतरादिभ्यः पञ्चभ्यः (७/१/९/२५) इति सर्वत्र पूर्वसूत्रेभ्यः कश्चिदंशः उत्तरसूत्रेषु अनुवर्तते । तथा पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्, मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् इत्यादयोऽपि अष्टाध्याय्याः क्रममाश्रित्यैव प्रवर्तन्ते । पाणिनीयानि सूत्राणि अष्टस्वध्यायेषु विभक्तानि, येन तेषामष्टाध्यायीति संज्ञा लब्धा ।

एकैकस्मिन् अध्याये चत्वारः पादाः वर्तन्ते । पादेषु च क्वचिदल्पसंख्याकानि क्वचित् शतद्वयादप्यधिकानि सूत्राणि वर्तन्ते । पाणिनिना बहवः नूतना उपाया उपज्ञाताः । परस्परलक्ष्यपरिहारेण चरितार्थयोर्द्वयोः सूत्रयोरेकत्र लक्ष्ये संघर्षो भवति चेद्, अष्टाध्यायीक्रमे यत् परं तत् प्रवर्तते इति निश्चितम् । यथा रामेभ्यः इत्यस्य प्रक्रियायाम्, **सुपि च** (७/३/१०२) **बहुवचने झल्येत्** (७/३/१०३) इत्यनयोः प्राप्तौ परं **बहुवचने झल्येत्** इति प्रवर्तते । तथा षष्ठाध्याये केषांचन सूत्राणाम् आभीयम् इति संज्ञां दत्त्वा तत्कृतानां कार्याणां परस्परमसिद्धत्वम् -- अज्ञानं कल्पितम्[1] । तथा, अष्टाध्यायीं सपादसप्ताध्यायीति त्रिपादीति च द्विधा विभज्य सपादसप्ताध्यायीं प्रति त्रिपाद्या असिद्धत्वं कल्पितम् । त्रिपाद्यामपि पूर्वं प्रति परस्यासिद्धत्वं कल्पितम् । तेन द्वयोः सूत्रयोरेकत्र प्राप्तौ त्रिपादीस्थस्य सूत्रस्य अभावं मत्वा सपादसप्ताध्यायीस्थं सूत्रं प्रवर्तते। सपादसप्ताध्यायीस्थसूत्रस्य निमित्ताभावात् त्रिपादीस्थसूत्रेण कार्ये जाते, तदाश्रित्य पुनः सपादसप्ताध्यायीस्थं सूत्रं न प्रवर्तते । त्रिपादीस्थसूत्राणां विषयेऽपीयमेव गतिः ।

२. व्याख्याप्रणाली

सूत्राणां व्याख्याने उपकारीणि कानिचन सूत्राणि वर्तन्ते । तानि च संज्ञासूत्राणि, परिभाषासूत्राणि, अतिदेशसूत्राणि, अधिकारसूत्राणि चेति चतुर्विधानि ।

१) संज्ञासूत्राणि । पाणिनिना आकारस्य ऐकारस्य औकारस्य च वृद्धिरिति संज्ञा कृता । अकारस्य एकारस्य ओकारस्य च गुण इति संज्ञा कृता । एवं ८० संज्ञा वर्तन्ते । पाणिनिना अक्षरमालाया वर्णा नूतनक्रमेण संस्थाप्य तत्र चतुर्दश व्यञ्जनानि योजितानि । अइउण्,

---

[1] अष्टाध्याय्यां असिद्धवदत्राभात् ६-४-२२ इत्यारभ्य चतुर्थपादे भस्य ६-४-१२९ इत्यधिकृत्य पादसमाप्तिपर्यन्तं यानि कार्याणि विधीयन्ते, तानि सर्वाणि कार्याणि आभीयसंज्ञया व्यवह्रियन्ते । तद्विधायकानि सूत्राणि च आभीयानि ।

ऋलृक्, एओङ्, ऐऔच्, हयवरट्, लण्, ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय्, शषसर्, हल्- इति । एतानि चतुर्दश माहेश्वरसूत्राणीति व्यवह्रियन्ते । एषु अन्त्यानां व्यञ्जनानाम् **इत्** इति संज्ञा । अन्त्येन इत्संज्ञकेन युक्तः आदिः वर्णः मध्यगानां स्वस्य च संज्ञा स्यात् । यथा - अण् इति अइउ वर्णानाम्, इक् इति इउऋलृवर्णानाम्, एच् इति सन्ध्यक्षराणाम्, यण् इति अन्तःस्थानाम्, शल् इति ऊष्मणाम्, अच् इति स्वराणाम्, हल् इति व्यञ्जनानां च संज्ञा । एवम्, ४१ संज्ञाः पाणिनिना प्रयुक्ताः । एताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते।

२) **सूत्रव्याख्यानिर्णायकानि परिभाषासूत्राणि** । सूत्रार्थबोधने सूत्रव्याख्याने च उपयोगीनि परिभाषा सूत्राणि । यथा **षष्ठी स्थानेयोगा** इति सूत्रम् **इको यणचि** इत्यत्र इक इत्यस्य इकः स्थाने इत्यर्थं बोधयति । **तस्मिन्निति निर्दिष्टे पूर्वस्य** इति सूत्रम् अचि इत्यस्य अचि परे ततः अव्यववहितपूर्वस्य कार्यं कर्तव्यमित्यर्थं बोधयति । एवम्, **यथासंख्यमनुदेशः समानाम्** इति सूत्रम् इउऋलृवर्णानां स्थाने क्रमेण यरलवर्णा आदेशा भवन्तीति बोधयति। एवमन्या अपि काश्चन परिभाषाः पाणिनिना कथिताः । पाणिनिना साक्षादनुक्ता अपि सूत्रेषु ज्ञापिताः, लोकन्यायात् सिद्धाश्च अधिकशताः परिभाषा बहुभिः संगृहीताः । प्रक्रियासर्वस्वकारस्तावत् एताः परिभाषाः न्यायशब्देन व्यवहरति ।

३) **अतिदेशसूत्राणि** । स्वस्मिन्नविद्यमानानां धर्माणामारोपः अतिदेशः। **स्थानिवदादेश**... इत्यनेन स्थानिनो धर्मा धातुत्वप्रत्ययत्वादयः तदादेशे अतिदिश्यन्ते । एवं कित्वङित्वादयो धर्माः प्रत्ययेष्वतिदिश्यन्ते । पूर्वोक्तः असिद्धत्वारोपोऽपि अतिदेश एव ।

४) **अधिकारसूत्राणि** । येन सूत्रेण स्वतः किमपि न विधीयते, किंतु उत्तरसूत्रेष्वनुवृत्त्यर्थमेव यदुच्यते तद् अधिकारसूत्रम् । यथा **एकः पूर्वपरयोः**, **पूर्वत्रासिद्धम्**, **अङ्गस्य**, **पदस्य**-इत्यादीनि ।

३. प्राचीनाः सूत्रव्याख्यातारः ।

सूत्रार्थग्रहणे पूर्वसूत्रादनुवर्तमानानां पदानाम् आवश्यकत्वात् व्याख्यानं विना सूत्रार्थग्रहणं दुश्शकम् । सूत्राणां विमर्शनात्मकं वार्तिकं सूत्रार्थग्रहणे आवश्यकं साहाय्यं न करोति । यद्यपि अधिकपञ्चसहस्राणि वार्तिकानि वर्तन्ते तथापि तैः केवलं १२५० सूत्राण्येव स्पृष्टानि। अन्येषां वार्तिकानि न सन्ति । ततः सूत्रवार्तिकयोः विशकलनात्मकं महाभाष्यं भगवता पतञ्जलिना रचितम् । तदपि सूत्रार्थज्ञानवताम् उपरिचिन्तनायैव उपकरोति । तत्र कः पूर्वपक्षः कः सिद्धान्तः कः अपसिद्धान्तः इति निर्धारणे पण्डितानामपि संमोहो जायते। महाभाष्यस्य प्रदीपव्याख्यानं रचितवतः कैयटस्य, शब्दकौस्तुभव्याख्यानं रचितवतः भट्टोजिदीक्षितस्य, कैयटदीक्षितयो व्याख्यातुः नागेशस्य च मतभेदाः दृश्यन्ते। महाभाष्यस्य व्याख्यात रत्नप्रकाशकारः शिवरामेन्द्रसरस्वती पदे पदे कैयटं खण्डयति । किं च १७०० सूत्राणामेव भाष्यं लभ्यते । पाणिनेः कालः क्रिस्तोः पूर्वं पञ्चम शतकमिति गवेषकैः निश्चितम्। तथा वार्तिककारस्य महाभाष्यकारस्य च कालः यथाक्रमं क्रिस्तोः पूर्वं तृतीयं प्रथमं च शतकमित्यपि निश्चितम् ।

४. अष्टाध्यायीक्रमानुसारिणी व्याख्याप्रणाली ।

इदानीमुपलभ्यमानम् अष्टाध्याय्याः व्याख्या काशिकावृत्तिसंज्ञितं क्रिस्तोरनन्तरं सप्तमशतके वामनजयादित्याभ्य विरचितम् । तत्र सर्वाणि सूत्राणि व्याख्याय उदाहरणानि दत्तानि ।

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु ।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसङ्ग्रहः ।।
इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ।।

इति ग्रन्थादौ तत्र प्रतिज्ञातम् । किं तु तस्य सर्वसङ्ग्रहणेच्छया क्वचि काठिन्यं जातम् । **वृद्धिरादैच्** इति प्रथमसूत्रे - वृद्धिशब्दः संज्ञात्वे

विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानाम् अतद्भावितानां च। तपरकरणमैजर्थम् - तादपि परस्तपरः इति खट्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तये इति व्याखाय आश्वलायनः, ऐतिकायनः, औपंगवः, औपमन्यवः, शालीयः, मालीयः इति षडुदाहरणानि च दत्तानि। उदाहरणानां व्युत्पत्तिज्ञानपूर्वकं व्याख्योक्ततद्भा- वितातद्भावितादिपदार्थज्ञानपूर्वकं सूत्रार्थग्रहणं छात्राणां सन्त्रासकमेव। तथा **इको गुणवृद्धी** इति तृतीयस्मिन् सूत्रे गुणः इति वृद्धिरिति च शब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इकः इति पदं योजनीयम् इति वक्तव्ये परिभाषेयं स्थानिनियमार्था। अनियमप्रसङ्गे नियमो विधीयते। वृद्धिगुणौ स्वसंज्ञया शिष्यमाणाविक एव स्थाने वेदितव्यौ। वक्ष्यति **सार्वधातुकार्धधातुकयोः, अङ्गस्य**, गुणः इति। स इक एव स्थाने वेदितव्यः। तरति नयति भवति। वृद्धिः खल्वपि अकार्षीत् अहार्षीत् अचैषीत् अनैषीत् अलावीत् अस्तावीत्। यत्र गुणवृद्धी स्वसंज्ञया विधीयेते तत्र इक इत्येतदुपस्थितं द्रष्टव्यम्। किं कृतं भवति, द्वितीया षष्ठी प्रादुर्भाव्यते। मिदिमृजिपुगन्तलघूपदर्च्छिदृ - शिक्षिप्रक्षुद्रेष्वङ्गेनेग् विशेष्यते। जुसि सार्वधातुकादिगुणेष्विकाङ्गं विशेष्यते। मेद्यते, अबिभयुः। इक इति किम्। आत्सन्ध्यक्षरव्यञ्जनानां मा भूत् । यानम्, ग्लायति, उम्भिता। पुनर्वृद्धिग्रहणं स्वसंज्ञया विधाने नियमार्थम्। इह माभूत्- द्यौः, पन्थाः, सः, इमम्- इति विवरणमुक्तम्। व्याकरणाध्ययनस्यारम्भे अस्य सर्वस्यापि ग्रहणम् अशक्यमेव। किंच, भवतीत्यस्य प्रक्रियायां प्रथमतः भूधातोः **वर्तमाने लट्** इति सूत्रेण लट् विधीयते। **लस्य, तिप्तस्झि....** इति लटः स्थाने ति इत्यादेशो भवति। धातुप्रत्यययोर्मध्ये **कर्तरि शप्** इति सूत्रेण शप् प्रत्ययो भवति। तं निमित्तीकृत्य धातोरूकारस्य **सार्वधातुकार्धधातुकयोः** इति सूत्रेण ओकार आदेशो भवति। **एचोऽयवायावः** इति ओकारस्य अवादेशो भवति। एतानि सूत्राणि चाष्टाध्याय्यां बहुषु स्थलेषु वर्तन्ते। काशिकापठनेन तेषामेकत्रोपस्थितिर्दुर्लभा। तस्मात् काशिकातः व्याकरणाध्ययनम् अत्यन्तं क्लेशावहम्। किं च येषां वैदिकप्रक्रियायां स्वरविधौ वा न तात्पर्यं भाषायामपि सन्धिकारकविभक्त्यर्थ-

समासलकारार्थादिषु क्वचिदेव तात्पर्यं तेषां काशिकातः आवश्यकानां सूत्राणां विविच्य अध्ययनं नैव शक्यम्।

५. प्रक्रियानुसारिणी व्याख्याप्रणाली।

अष्टाध्याय्याः सूत्राणि संज्ञादिविषयानुसारं बहुधा विभज्य एकैकस्मिन् प्रकरणे आवश्यकानि सूत्राणि तत्रानीय पूर्वपूर्वं प्रकरणं यथा उत्तरोत्तरप्रकरणस्य उपकारकं भवति तथा सम्पादयितुं कश्चित् श्रमः कृतः। तस्य प्रथमप्रसवः धर्मकीर्तेः रूपावतारः। तत्र बहूनि सूत्राणि न व्याख्यातानि। स्वरवैदिकप्रकरणं च सर्वथा उपेक्षितम्। ततः चतुर्दशशतके रामचन्द्रेण प्रक्रियाकौमुदी नाम प्रक्रियाग्रन्थो रचितः। स तावत् सिद्धान्तकौमुद्याः आदर्शभूतः । तत्र स्वरवैदिकप्रकरणमपि किञ्चित् स्पष्टम्। तथापि बहूनि सूत्राणि न व्याख्यातानि। ततः षोडशे शतके भट्टोजिदीक्षितेन सिद्धान्तकौमुदी नाम ग्रन्थो विरचितः यत्र अष्टाध्याय्याः सर्वाणि सूत्राणि व्याख्यातानि। स चेदानीं लोके प्रसिद्धं गतः, तत्रत्यानि प्रकरणानि च संस्कृताध्येतारः सर्वेऽपि जानन्ति च।

६. प्रक्रियासर्वस्वम् - रचयिता नारायणभट्टः।

प्रक्रियासर्वस्वाख्यो ग्रन्थः प्रक्रियानुसारिव्याख्याप्रणालीमनुसृत्य विरचितेषु व्याकरणग्रन्थेषु विशिष्यते। अस्य रचयिता भट्टोजिदीक्षितस्य समकालिकः श्रीमद्भागवतसङ्ग्रहात्मकस्य नारयणीयाख्यस्य स्तोत्र-काव्यस्य कर्ता मेल्पुत्तूर्ग्रामाभिजनः नारायणभट्टो नाम महान् वैयाकरणः केरलीयानामभिमा-नभाजनम्। तस्मिन् काले भट्टोजि-दीक्षितस्य सिद्धान्तकौमुदीरचनासंरम्भः केरलेष्वज्ञातः।तस्मात् अम्बरधुनी देशाधिपतिः देवनारायणनामा स्वास्थानपण्डितं नारायणभट्टपादमाहूय

वृत्तौ चारु न रूपसिद्धिकथना रूपावतारे पुनः
कौमुद्यादिषु चात्र सूत्रमखिलं नास्त्येव तस्मात् त्वया।
रूपानीतिसमस्तसूत्रसहितं स्पष्टं मितं प्रक्रिया-

सर्वस्वाभिहितं निबन्धनमिदं कार्यं मदुक्ताध्वना।।१।।[2]

इत्यादिदेश। एवमादिष्टः भट्टपादः तदादेशानुसारं ग्रन्थं निर्माय तस्य प्रक्रियासर्वस्वमिति अन्वर्थं नाम कृतवान्। प्रकृतिप्रत्ययविभागेन शब्दानां व्युत्पादनं प्रक्रिया। तासां सर्वस्वम्। स्वशब्दः आत्मपर्यायः, अत्र स्वरूपपरः। प्रक्रियाणामशेषस्वरूपमित्यर्थः। तत्प्रतिपादकग्रन्थोऽपि प्रक्रियासर्वस्वमिति व्याख्यातृभिः तस्यार्थः प्रतिपादितः। नारायणभट्टपादः १५६० तमे क्रिस्त्वब्दे जन्म लेभे इति प्रसिद्धम्। तस्य निधनं कदाभूत् इत्यत्र विवदन्ते पण्डिताः। केचित् स ८६ वर्षाणि जीवति स्मेति, अपरे १०६ वर्षाणि जीवति स्मेति च वदन्ति।

७. प्रक्रियासर्वस्वस्य रचनाकालः।

प्रक्रियासर्वस्वस्यारम्भे-

अयमच्युतगुरुकृपया पाणिनिकात्यायनादिकारुण्यात्।
यत्नः फलप्रसूः स्यात् कृतरागरसोऽद्य शब्दमार्गजुषाम्।।[3]

इत्येकः श्लोको दृश्यते । तत्र 'यत्नःफलप्रसूः स्यात्' (१७२३२०१) इति ग्रन्थारम्भकलिदिनसंख्यां 'कृतरागरसोऽद्य' (१७२३२६१), इति ग्रन्थपरिसमाप्ति-कलिदिनसंख्यां च बोधयतीति बहवो मन्यन्ते। तदनुसारं १६१७ तमे क्रिस्त्वब्दे जनवरिमासस्य मध्ये आरभ्य तस्मिन्नेव वर्षे मार्चमासस्य मध्ये षष्ट्या दिवसैः समाप्तिं नीतोऽयं ग्रन्थ इति विश्वसनीयं भवति।

रासविलासविलोलं भजत मुरारेर्मनोरमं रूपम्।
प्रकृतिषु यत्प्रत्ययवत् प्रत्येकं गोपिकासु सम्मिलितम्।।[4]

इति प्रक्रियासर्वस्वस्य मङ्गलपद्यम्। इदं मनोहरं पद्यं श्रुत्वा मुग्धचेताः भट्टोजिदीक्षितः प्रक्रियासर्वस्वकारं दिदृक्षुः केरलान् प्रति

---

[2]. प्रक्रियासर्वस्वम्, गुरुवायूर देवस्वप्रकाशनम् , १९९८ पृ.१

[3] तत्रैव , पृ.२

[4] तत्रैव , पृ.१

प्रस्थितः इति, मध्येमार्गं भट्टपादस्य निधनवृत्तान्तं श्रुत्वा प्रतिनिवृत्त इति च काचित् प्रथा वर्तते।

८. विषयविभागः।

इह संज्ञा परिभाषा सन्धिःकृत्तद्धिताः समासाश्च।
स्त्रीप्रत्ययाः सुबर्थाः सुपां विधिश्चात्मनेपदविभागः।
तिङपि च लार्थविशेषाः सनन्तयङ्यङ्लुकश्च सुब्धातुः।
न्यायो धातुरुणादिश्छान्दसमिति सन्तु विंशतिः खण्डाः।[५]

इति तदादेशानुसारेण विषयविभागोऽप्यादृतः। प्रक्रियासर्वस्वे प्रथमखण्डे षट्पञ्चाशता सूत्रैः संज्ञाः समाख्याताः। अइउणादीनि चतुर्दश माहेश्वरसूत्राणि प्रस्तुत्य अज्झलादयः एकचत्वारिंशत् प्रत्याहाराश्च कथिताः। ततः परिभाषाखण्डे **इको गुणवृद्धी, षष्ठी स्थानेयोगा** इत्यादयः अष्टादश परिभाषाः वर्णिताः । ततः तृतीयस्मिन् सन्धिखण्डे प्रथमं तुगागमः सुडागमश्च वर्णितः । ततः क्रमेण अच्सन्धिः, प्रकृतिसन्धिः, हल्सन्धिः, विसर्गसन्धिः, स्वादिसन्धिः इति पञ्च सन्धयः निरूपिताः। तदनन्तरं चतुर्थखण्डे प्रथमं कृत्प्रत्ययाः निरूपिताः। अथ सुपां प्रातिपदिकाश्रयत्वात् प्रातिपदिकानां च कृत्तद्धितसमासान् विना दुर्लभत्वात् कृदादयस्तावत् कथ्यन्ते इति सङ्गतिश्च दर्शिता। कृत्खण्डे ७२१ सूत्राणि व्याख्यातानि। पश्चात् पञ्चमे खण्डे नामपदात् नामान्तरनिष्पादनार्थं संयोज्यमानाः तद्धिताख्याः प्रत्ययाः निरूपिताः। तत्र अष्टाध्याय्याः चतुर्थे अध्याये विहितानां प्रत्ययानामर्थाः **अपत्यं रक्तयुक्ते च** ... इत्यारभ्य पञ्चभिः श्लोकैः[६], **ठक् स्यात् पूर्वं वहत्यर्थात्...** इत्यादिभिः चतुर्भिः श्लोकैश्च[७] सङ्गृहीताः । पञ्चमाध्यायेऽपि तद्धितप्रत्यया एव विहिताः। तेषामर्थास्तु न सङ्गृहीताः। तद्धितखण्डे अधिकसहस्राणि सूत्राणि व्याख्यातानि

---

[५] तत्रैव , पृ.१
[६] प्रक्रियासर्वस्वम् , पृ.१३५
[७] प्रक्रियासर्वस्वम् , पृ.२०७

अस्मिन् खण्डे सरस्वतीकण्ठाभरणादुद्धृत्य अपत्यगणाश्च परिगणिताः। षष्ठे समासखण्डे क्रमेण अव्ययीभावः, तत्पुरुषः , बहुव्रीहिः,द्वन्द्वश्च व्याख्याताः। **सह सुपा** इति सूत्रे योगविभागो नोक्तः । ततः सामान्येन समासान्तप्रत्ययाः उक्ताः । विशेषविहिताः समासान्तप्रत्ययास्तु तत्तत्समासविधावेव उक्ताः। एकशेषप्रकरणं तु द्वन्द्वसमासस्य अन्ते योजितम्। ततः षष्ठाध्याये तृतीयपादे उत्तरपदे परतः पूर्वपदस्य विहितानि कार्याणि वर्णितानि। तत्रैव अन्ते षत्वविधिः णत्वविधिश्च प्रतिपादितः। सप्तमे खण्डे स्त्रीप्रत्ययान्तानामपि विभक्तिप्रकृतित्वात् तेऽपि कथ्यन्ते इति प्रतिज्ञाय स्त्रीप्रत्ययाः परिगणिताः।

क्षीणत्वमृदुलत्वादिर्वस्तुष्वपचयो यः
स स्त्रीत्वमिति भाष्योक्तं मृणाल्यादौ स योज्यताम्।।[८]

इति स्त्रीत्वस्य परिचयो दत्तः । अष्टमे खण्डे।

सुपां प्रकृतिभूतेषु ङ्याप्प्रातिपदिकेष्विह।
उक्तेष्वथ सुपो वक्तुं सुबर्थान् ब्रूमहेऽधुना।।[९]

इति कारकसंज्ञाविधानपूर्वकं विभक्त्यर्थो वर्णितः। नवमे खण्डे तु सुब्विधिः प्रतिपादितः। तत्र क्रमेण अजन्तानां हलन्तानां च शब्दानां सुबन्तरूपाणि प्रदर्शितानि। तत्रैवान्ते अव्ययानि च दर्शितानि। एवं सुबन्तप्रक्रियां परिसमाप्य दशमे खण्डे तिङन्तप्रक्रियाम् आरब्धुं प्रथमम् आत्मनेपदविधायकानि परस्मैपदविधायकानि च सूत्राणि व्याख्यातानि। एकादशे खण्डे भ्वादिषु दशसु गणेष्वन्तर्भूताः केचिद्धातवः प्रक्रियानिर्वाहार्थं दर्शिताः । एकादशे खण्डे हेतुमण्णिच् प्रतिपादितः। ततः द्वादशे खण्डे लकाराणामर्थविशेषाः वर्णिताः । ततः चतुर्षु खण्डेषु

---

[८] प्रक्रियासर्वस्वम् , पृ.३४२

[९] प्रक्रियासर्वस्वम् , पृ.३५५

सन्नन्ताः, यङन्ताः, यङ्लुगन्ताः, सुबन्तप्रकृतिकधातवश्च प्रतिपादिताः । ततः सप्तदशे खण्डे

> बुहूपयुक्ता युक्तौ ये रूपसिद्धावपि क्वचित्।
> तान् न्यायानेकतो वक्ष्ये भोजराजोक्तवर्त्मना।।[१०]

इति पाणिनिना ज्ञापिताः लोकसिद्धाश्च न्यायाः परिभाषापरनामधेया वर्णिताः। ततः अष्टादशे धातुखण्डे माधवीयधातुवृत्त्यनुसारं सर्वे धातवः परिगणिताः। एतेषां धातूनां क्रमेण रूपप्रदर्शनार्थं धातुकाव्यं नाम किञ्चित् काव्यमपि भट्टपादेन विरचितम्। केचन धातवस्तावद् द्वित्रेषु गणेषु पठिताः। तेषां प्रथमोल्लेखने एव ते अन्यत्र यत्र गणेषु पठ्यन्ते इत्यपि दर्शितम्। अन्ते तावत् कल्पद्रुमे पठिताः धातुवृत्तौ अदृष्टाः अपि चतुश्शतपरिमिताः धातवः सङ्गृहीताः। तदनन्तरम् अष्टात्रिंशत् सौत्रा धातवः परिगणिताः। तिङ्खण्डादनन्तरं छान्दसखण्डात् पूर्वम् एकोनविंशे खण्डे उणादिप्रत्यया निरूपिताः ।

> धात्वर्थमाश्रित्य भवन्त्युणादिका उणाद्यधीना निगमेऽपि च स्वराः
> अतः कृदन्तर्गतमप्युणादिकं धातोः परं छान्दसतोऽपरं ब्रुवे।[११]

इति उणादिखण्डस्य तत्र निवेशने उपपत्तिश्च दर्शिता। तत्र पञ्चपाद्यां प्रसिद्धान्युणादिसूत्राणि व्याख्याय, तदनन्तरं **अवतेर्विड्वलोपो दीर्धश्च वा** इत्यादिभिः पञ्चदशभिः सूत्रैरकारादीनां वर्णानां निष्पत्तिप्रकारो वर्णितः[१२] । अन्ते भोजोक्तानि १५३ सूत्राणि च संगृहीतानि[१३]। विंशे छान्दसे खण्डे प्रथममष्टाध्यायीक्रमेण वेदमात्रप्रसिद्धानां शब्दानां प्रक्रियां प्रतिपाद्य, अन्ते प्रकृति- प्रत्यय समासादिस्वरा निरूपिताः। मध्ये फिट्सूत्राणि च व्याख्यातानि।

---

[१०] प्रक्रियासर्वस्वम् , पृ.५३८

[११] प्रक्रियासर्वस्वम् , पृ.६५४

[१२] प्रक्रियासर्वस्वम् , पृ.७३७-३८

[१३] प्रक्रियासर्वस्वम् , पृ.७३८-७५१

९. प्रक्रियासर्वस्वस्य निर्माणाय उपयुक्ताः ग्रन्थाः।

वृत्तिं तद्धरदत्तरामविवृती भाष्यादिकं कौमुदीं
तद्व्याख्यामपि धातुवृत्तियुगलं दैवं च कल्पद्रुमम्।
भोजोक्तिद्वयदण्डनाथविवृतीर्भट्ट्यादिकाव्यत्रयं
त्रिस्त्रश्चामरकोशनामविवृतीः संप्रेक्ष्य संक्षिप्यते।।[१४]

इति भट्टपादेनैव निर्दिष्टाः। अत्र वृत्तिः काशिकावृत्तिः, तद्विवृतिपदेन हरदत्तस्य पदमञ्जरी, रामदेवविरचितः वृत्तिप्रदीपश्च ग्राह्यौ। कौमुदी चात्र रामचन्द्रस्य प्रक्रियाकौमुदी, न तु सिद्धान्तकौमुदी। तद्व्याख्या विट्ठल विरचिता प्रसादाख्या। धातुवृत्तियुगलं माधवीया धातुवृत्तिः, क्षीरस्वामिनः क्षीरतरङ्गिणी च। दैवं देव निर्मितम्, कविकल्पद्रुमो बोपदेवकृतः। भोजोक्तिद्वयं सरस्वतीकण्ठाभरणं शृङ्गार प्रकाशश्च। दण्डनाथविरचिता सरस्वतीकण्ठाभरणविवृतिः भट्ट्यादि काव्यत्रयं भट्टिविरचितं रावणवधम्, केरलीयं नारायणस्य सुभद्राहरणं, वासुदेवभट्टस्य वासुदेवविजयश्च। अमरकोश-व्याख्यात्रयं च क्षीरस्वामिनः अमरकोशोद्घाटनम्, सर्वानन्दस्य टीकासर्वस्वं जातवेददीक्षितस्य सुबोधिनी च। एतदतिरिच्य तत्र तत्र बहवो ग्रन्था प्रक्रियासर्वस्वे समुद्धृता दृश्यन्ते।

१०. प्रक्रियासर्वस्वस्य वौशिष्ट्यम्।

१) अनुवृत्त्यादिकथनं विना सूत्रार्थः स्पष्टं विव्रियते।

२) यद्यपि प्रक्रियानिर्वाहार्थम् अष्टाध्याय्याः क्रमो लङ्घितः, तथापि यावच्छक्यं स क्रमः संरक्षितः। तुग्विधिः, सुड्विधिः षत्वविधिः णत्वविधिश्चात्र दृष्टान्तः।

३) वार्तिकानि यथेष्टं परिवर्त्य अवतारयति।

"यथास्थितं वार्तिकभाष्यवाक्यं न वृत्तिकारादिभिरप्युपात्तम्

[१४] प्रक्रियासर्वस्वम् , पृ.१३४

सा कौमुदीचार्थत एव वक्ति तथा वदन्तो वयमप्यदोषाः।"[१५]

इति । तत्समर्थयते च।

४) क्वचिदुदाहरणानि मनोहरं वाक्यं रचयन्ति। यथा **एचोऽयवायावः** इति सूत्रस्य क्रमेण दत्तानि 'श्रद्धया विष्णवे गायति स्तावकः' इति चत्वार्युदाहरणानि संहत्य अर्थवद्वाक्यं जनयन्ति।

५) क्वचित् सूत्रार्थस्पष्टीकरणार्थं बहून्युदाहरणानि दीयन्ते। **इष्टादिभ्यश्च** इति सूत्रस्य-

इष्टी सर्वमखे, श्रुती श्रुतिशते, तत्त्वे गृहीत्यर्चिती
गोविन्दे, पठिती तथानुपठिती शास्त्रेषु सर्वेष्वपि।
शत्रौ व्याकुलिती, तथा खलजने दूरं निराकृत्यसौ
मित्रेषूपकृती, विभाति नृपतिर्दीनेषु संरक्षिती।।
आम्नाती निगमे, ग्रहेषु गणिती, धर्मेऽवधारित्यसा-
वाचारे परिरक्षिती, निकथिती, श्रेयःसु नित्यं नृणाम्।
न्यायेष्वप्यवकल्पिती, परिकलित्युच्चैः कलाकौशले
वैद्ये सङ्कलिती, विराजति सुधीरासेविती केशवे।।
अधीती वेदे[१६]

इति च विंशतिरुदाहरणानि प्रदर्शितानि।

६) कवित्वप्रचोदितः क्वचित् उदाहरणानि श्लोकरूपेण ददाति। यत्र विवरणमावश्यकं तत्प्रायेण श्लोकैरेव क्रियते। आहत्य प्रक्रियासर्वस्वे ९१३ श्लोका दृश्यन्ते ।

७) वृत्तिकारादयः पाणिनीयसूत्रैः साधूकर्तुमशक्यान् विश्रामादीन् महाकविप्रयोगान् प्रमादकृतान् मन्यन्ते।

प्रक्रियासर्वस्वकारस्तु-

---

[१५] प्रक्रियासर्वस्वम् , पृ.५०४

[१६] प्रक्रियासर्वस्वम् , पृ.२५०

विश्रामस्यापशब्दत्वं वृत्त्युक्तं नाद्रियामहे।
मुरारिभवभूत्यादीनप्रमाणीकरोति कः।।[१७]

इति पृष्ट्वा,

दृष्ट्वा शास्त्रगणान् प्रयोगसहितान् प्रायेण दाक्षीसुतः
प्रोचे तस्य तु विच्युतानि कतिचित्कात्यायनः प्रोक्तवान्।
तद्भ्रष्टान्यवदत् पतञ्जलिमुनिस्तेनाप्यनुक्तं क्वचित्
लोकात् प्राक्तनशास्त्रतोऽपि जगदुर्विज्ञाय भोजादयः।।[१८]

इति तेषामपि साधुत्वं प्रतिपादयति। अपाणिनीयप्रामाण्यसाधनाख्यं क्रोडपत्रमपि नाराणभट्टपादेन रचितम्।

११ उपसंहारः ।

समकालेभ्यः पण्डितेभ्यः अलब्धाङ्गीकारोऽयं महान् वैयाकरणो नारायणभट्टः संस्कृतवाङ्मये तदानीं स्थिरं पदं न लब्धवान्। इयं च साधारणी शुक् महाकवीनामपि। यदाह भवभूतिः -

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यते तु मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी।।[१९] इति

तथा प्रक्रियासर्वस्वकारोऽपि

विद्वांसो विदितं हि सर्वमिति न द्रक्ष्यन्ति, मन्दाः पुनः
प्रारभ्याधिकमार्गदर्शनपरिभ्रान्ता विरंस्यन्ति च।
अन्ये मत्सरिणः कथामपि च नो कुर्युः किमेतैः क्षतं
यन्मद्बुद्धिविशुद्धये नरपतेर्मोदाय चेदं कृतम्।।[२०]

---

[१७] प्रक्रियासर्वस्वम् , पृ.१०७
[१८] अपाणिनीयप्रामाण्यसाधनम् गुरुवायूर देवस्वप्रकाशनम् १९९८ , पृ.६
[१९] मालतीमाधवम्, १.८

इति स्वयं सान्त्वयामास। गाम्भीर्येण सिद्धान्तकौमुद्या समस्य, लालित्येन तामतिशयानस्य च प्रक्रियासर्वस्वस्य विषयेऽद्याप्यस्माभिः पर्याप्ता परिगणना न दत्तेति मन्ये। केरल विश्वविद्यालयस्य प्राच्यग्रन्थगवेषणकेन्द्रेण षष्ट्या वर्षैः, सप्तसु भागेषु मुद्रितः प्रकाशितश्चायं ग्रन्थः। तत्र कृदन्तपर्यन्तो भागः श्रीमता साम्बशिवशास्त्रिणा स्वविरचितया व्याखया सह प्रकाशितः। तद्धितखण्डस्तावत् उपोद्घातसूचिकादिपरिकरसहितः सम्यक् मुद्रितः। तद्धितखण्डः मद्रास्विश्वविद्यालयेनापि सुष्ठु प्रकाशितः। तदनन्तराणां भागानां प्रसाधने तावत्यास्था न प्रकटिता। ततः १९९८ तमे वर्षे गुरुवायुपुरदेवस्वाधिकृतैः सम्पूर्णो ग्रन्थः एकस्मिन् सम्पुटे प्रकाशितः। तत्रापि पूर्वावस्थातः प्रकर्षो न दृश्यते। जगद्गुरोः शङ्कराचार्यस्य नाम्नि कालट्यां स्थापितेन संस्कृतविश्वविद्यालयेन अस्य ग्रन्थतल्लजस्य यथोचितं प्रसाधनं भूयादित्याशास्महे।

---

[२०] प्रक्रियासर्वस्वम् , पृ.४११

पतञ्जलिकृतभाष्यगतन्यायाः मीमांसान्यायाश्च-तुलनात्मकसमीक्षा

प्रो. आर्. वासुदेवन् पोट्टि ।

पदवाक्यप्रमाणज्ञानामेव दर्शनान्तराध्ययनेऽधिकार इति खलु अभिज्ञानामाघोषः । तत्र पदशब्देन पदसाधुत्वानुशासनपरं व्याकरणम्, वाक्यशब्देन वेदवाक्यार्थनिर्णयाय प्रवृत्तं पूर्वमीमांसाशास्त्रम्, तथा प्रमाणपदेन प्रत्यक्षादि प्रमाणप्रतिपादकं न्यायदर्शनञ्च विवक्षितमिति विदितमेव समेषां सुधियाम्। न हि पदतदर्थज्ञानमन्तरा शास्त्राणां प्रवृत्तिः साधुपदज्ञानं च व्याकरणाधीनम् । अस्मिन्नर्थे इदं पदं साधु अर्थान्तरे तु असाधु इति साधुत्वज्ञानं अर्थविशिष्टपदनिबन्धनम् । अत एवोक्तं 'भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनं साधुत्व' मिति वैयाकरणभूषणसारे धात्वर्थनिरूपणे । दरिद्रवाचकः अस्वशब्दः साधुः, तुरगार्थेऽसाधुः, तत्र तु अश्वशब्दः साधुः । एवमन्यत्रापि । एवं पदसमुदायात्मकस्य वाक्यस्यार्थनिर्णयाय प्रवृत्तं मीमांसाशास्त्रमपि वाक्यार्थनिर्णायकन्यायप्रतिपादनद्वारा सर्वशास्त्रोपकारकं भवति। मीमांसाशब्दश्च 'मानेर्जिज्ञासाया' मिति वार्तिकानुसारेण यद्यपि जिज्ञासावचनस्तथापि प्रकृते जिज्ञासाप्रयोज्यविचारार्थको द्रष्टव्यः । यद्यपि मीमांसा वेदवाक्यार्थविचारपरा तथापि सर्वत्र वाक्यार्थनिर्णयाय तत्रोन्नीता न्यायाः अत्यन्तोपकारकाः । अत एव नियमव्याख्यातारः प्राड्विवाकादयः शास्त्रमिदं अध्येतुमिच्छन्ति, समाद्रियन्ते च। एवं न्यायशास्त्रमपि प्रमेयस्वरूपावगमार्थं समादरणीयानां प्रमाणानां सूक्ष्मदृष्ट्या प्रतिपादनेन शास्त्रान्तरोपकारकं विराजते। एतावता व्याकरणस्य पूर्वमीमांसायाः च प्रामुख्यां सिद्ध्यति ।

व्याकरणं शब्दानुशासनं पाणिनीयमेव वेदाङ्गत्वेन गण्यते । शेषावतारत्वेन प्रकीर्तितेन प्रणीतं व्याकरणमहाभाष्यमेव तत्र

परमप्रमाणम्। यथोत्तरं मुनीनां प्रामाण्यमित्यभ्युपगमात् । तदेव महाभाष्यसंज्ञया प्रथते, 'भाष्यस्यास्य महत्त्वं स्याद्वार्तिकोपरिचिन्तनात्' इति प्रामाणिकानां वचनम् । तत्र स्वाभीष्टार्थोपपादनाय अनेके लौकिका वैदिकाश्च न्यायाः अभ्युपगता दृश्यन्ते । 'शास्त्रेण धर्मनियमः यथा लौकिकवैदिकेषु' 'न हीदं लोकाद्भिद्यते' इत्येवमादिषु न्यायसमाश्रयणं कण्ठत एवोक्तम् । अतः पातञ्जलमहाभाष्यगतानां न्यायानां समुल्लेखनं मीमांसान्यायैस्तुलनं च नास्थाने स्यादिति मन्ये । भाष्यगतानां सर्वेषां न्यायानां चयनं समीक्षणं च अल्पीयसा कालेन कर्तुं न शक्यते । अतः केचनैव भाष्ये उन्नीताः न्यायाः मीमांसान्यायैः सह तोलनेन समीक्षीता इति प्रथमतो निवेद्यते।

मीमांसायां परिसंख्यान्यायः 'तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते' इति 'पञ्च पञ्चनखाः भक्ष्याः' दृष्टान्तेनोपपादितः । अन्यभक्षणनिवृत्तिपरोऽयं विधिः । अयं च न्यायः पतञ्जलिनाप्यभ्युपगतो दृश्यते । शब्दानुशासनं कर्तव्यमिति प्रतिज्ञाय तत्कथं कर्तव्यं, किं शब्दोपदेशः कर्तव्यः, उतापशब्दोपदेशः, आहोस्विदुभयोपदेशः इति शङ्का तत्रोद्भाविता तत्र च समाधीयते- "अन्यतरोपदेशेन कृतं स्यात् तद्यथा भक्ष्यनियमेन अभक्ष्यप्रतिषेधो गम्यते-पञ्च पञ्चनखाः भक्ष्याः इत्युक्ते गम्यते-अतोऽन्येऽभक्ष्या इति । तथा अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः - तद्यथा अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यते एतदारण्यो भक्ष्य इति । अत्र परिसंख्याविधिरिति मीमांसकैरुक्तम् । अतः भक्ष्यनियमः इति भाष्यवचनमसङ्गतमिति शङ्कायामुच्यते कैयटेन- अर्थित्वाद् भक्षणं प्राप्तं पञ्चसु पञ्चनखेषु नियम्यमानं सामर्थ्यादन्येभ्यो निवर्त्तते, न त्वयं विधिः अप्राप्तेरभावादिति। नियमेऽपि अप्राप्तांशपूरणरूपफलबोधनद्वारा आर्थी अन्यनिवृत्तिः अस्त्येवेति अभेदमाश्रित्य नियमत्वोक्तिरिति भावः । वस्तुतः नियमपरिसंख्ययोर्भेदोऽस्ति । पाक्षिकाप्राप्तिकोऽप्राप्तांशपरिपूरणफलो नियमः । यथा व्रीहीनवहन्ति - अत्रावहननेनैव वितुषीकरणमिति नियम क्रियते । अन्यनिवृत्तिफला च परिसंख्या रागतः सिद्धस्य भक्षणस्य

पुनर्विधानसामर्थ्यात् प्रापकप्रमाणस्य तदितरविषयत्वरूपसङ्कोचः कल्प्यते । एवं । सामान्यप्रमाण-सङ्कोचफलितमर्थ -मादायान्ययोगव्यवच्छेदः एवकारार्थोऽपि संगमनीयः । एवं सङ्कोचेन पञ्च पञ्चनखव्यतिरिक्तानां भक्षणाभावः तद्भक्षणे प्रायश्चित्तं च सिद्ध्यति। अतोऽत्र मीमांसकाभिमतः परिसंख्यान्यायः नियमपरतया भगवता व्याख्यातः ।

इदमपरं प्रकरणम् । शब्दस्य ज्ञाने धर्मः उत प्रयोगे इति तत्र विचारः प्रवर्तितः । यदि शब्दस्य ज्ञाने धर्म इत्युच्यते तर्हि शब्दज्ञानवतः अपशब्दज्ञानञ्चास्तीति अपशब्दानां भूयस्त्वाद् भूयान् अधर्मः स्यादिति शङ्का कृता । तथा प्रयोगे धर्मः इत्युच्यमाने व्याकरणाध्ययनं विनापि सर्वेषां अभ्युदयः स्यादिति व्याकरणाध्ययनार्थः प्रयत्नो व्यर्थः स्यादिति दोष उद्भावितः । "फलवता नाम प्रयत्नेन भवितव्यं" 'न च प्रयत्नः फलाद् व्यतिरेच्यः' इति वदता पूर्णपक्षिणा । कृतप्रयत्नाश्चाप्रवीणाः, अकृतप्रयत्नाश्च प्रवीणा इति कौशलव्यतिरेकवद् फलव्यकिरेकः स्यादिति व्याकरणाध्ययनं व्यर्थमेवेति आशङ्क्य 'शास्त्रज्ञानपूर्वकं यः शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते' इति समाधानमुक्तम् । तत्र दृष्टान्तमाह भगवान् भाष्यकारः- 'योऽग्निष्टोमेन य उ चैनमेवं वेद, योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद' इति । यथाग्निष्टोमादेर्वेदाध्ययनपूर्वकं प्रयोगो धर्मः श्रुतिबोधितस्तथा साधुशब्दानामपि व्याकरणज्ञानपूर्वकं प्रयोगे धर्मः इति 'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति' श्रुतिबोधितः । अत्र सम्यग्ज्ञात इत्यनेन प्रकृतिप्रत्ययविभागपूर्वकं ज्ञात इत्यर्थो विवक्षितः । शास्त्रान्वित इत्यस्य व्याकरणशास्त्रज्ञानपूर्वकं ज्ञात इति सुप्रयुक्त इत्यस्य अर्थानुसन्धानपूर्वकं स्थानप्रयत्नादि विभागेन प्रयुक्त इति चार्थः । अत्र च फलविशेषन्यायः मीमांसायां प्रदर्शितः संसूच्यते । तथाहि - जैमिनीयदर्शने प्रथमाध्यायस्य द्वितीयेपादे अर्थवादाधिकरणे 'अन्यानर्थक्यादिति' सूत्रे एवमुच्यते 'पूर्णाहुत्या सर्वान्

सर्वान्कामानवाप्नोति तरति मृत्युं तरति ब्रह्महत्यां. योऽश्वमेधेन यजते य उ चैनमेवं वेद इत्यादि वाक्यानामप्रामाण्यं आशङ्कितम् । अग्निसिद्ध्यर्थं क्रियमाणे आधाने पूर्णाहुतिर्विधीयते । यदि अनया पूर्णाहुत्या सर्वकामावाप्तिः स्यात् बह्वायाससाध्यानि दर्शपूर्णमासादीनि आचरितुं लोकानां प्रवृत्तिर्नस्यात् । तानि च कर्माणि अनर्थकानि भवेयुः । अतः बह्वपेक्षया एकस्यास्याप्रामाण्यं उचितम् । एवमश्वमेधयागस्यानुष्ठानेन यत्फलं मृत्युतरणब्रह्महत्यातरणरूपं तच्चेदश्वमेधवेदनेनैव सम्पद्येत, तदनुष्ठाने पुरुषः कथं प्रवर्तेत । 'अट्टे चेन्मधुविन्देत किमर्थं पर्वतं व्रजेत्'.. । तत्रेदं समाधानरूपं सूत्रम् - फलस्य कर्मनिष्पत्तेः लोकवत्परिमाणतः फलविशेषः स्यात् - सेवातारतम्येन लोके भृत्याः फलतारतम्यमाप्नुवन्ति । तत्र तत्र नियुक्ताः ते तारतम्येन भृतिमवाप्नुवन्ति. एकैकोऽपि ब्रवीति च अवाप्तव्यं सर्वमवाप्नुयामिति । तत्र सर्वशब्दः स्वस्वावाप्तव्यपरिमाणवाची, तथैव सर्वान्कामानवाप्नोतीत्यत्र सर्वशब्दोऽवगन्तव्यः। फलस्य कर्मनिष्पत्तेरित्यंशस्यायमर्थः- सनियममनुष्ठीयमानैरेव कर्मभिः फलस्य निष्पत्तिः । सर्वः सर्वाणि फलानि कामयितुं प्रभुः तत्राधिकारी सन् फलं कामयेत । अधिकारी विशेषणसम्पन्नः सनियमं कर्माणि कुर्वीत । तथा कर्मस्वनुष्ठीयमानेषु कर्मानुसारी अवाप्तव्यं सर्वं फलमवाप्नुयात् । एवं च कर्मानुसारी फलमधिकारिणा लभ्यते इत्यतः प्रकृतेऽपि शास्त्राध्ययनप्रकृतिप्रत्ययविभागज्ञानपूर्वकशब्दप्रयोगे एव धर्मः, तत्रापि फलतारतम्यमिति अवाप्तव्यं सर्वं कामं लभतेऽधिकारीति मीमांसान्यायोऽत्र भगवता संसूचितो वेदितव्यः । तत्र भाष्ये कृतप्रयत्नस्य प्रावीण्यम् इत्यस्यायमर्थः - प्रतिबन्धकाभाववत्कारणकलाप एव कार्यसाधकः इत्यत्र प्रावीण्योत्पत्तिप्रतिबन्धदूरीकरणाय तत्र कृतः प्रयत्नोऽपेक्षित इत्यवगन्तव्यः । तथा पूर्वजन्मकृतप्रयत्नसंस्कारवशादत्र जन्मनि प्रयत्नाकरणेऽपि फलनिष्पत्तिरिति च व्याख्येयम् ।

परस्पशाह्निके पूर्वोक्तप्रकरणे एव अपशब्दस्याधर्महेतुत्वं नास्ति यथा अशिष्टाप्रतिषिद्धस्य हिक्कितहसितकण्डूयनादेर्नाधर्महेतुत्वम् ।

तथा अपशब्दज्ञानमपि न शिष्टं नापि निषिद्धम्। किञ्च तुष्यतु दुर्जनन्यायेन अपशब्दज्ञानस्याधर्महेतुत्वाभ्युपगमेऽपि कूपखानकन्यायेन स दोषो निर्हन्येतेत्युक्तम्। यथा कूपखानकः कूपं खनन् मृदा पांसुभिश्चावकीर्णो भवति, सोऽप्सु संजातासु तत एव तं गुणमासादयति येन स दोषो निर्हण्यते भूयसा चाभ्युदयेन युज्यते। एवं यद्यप्यपशब्दज्ञानेऽप्यधर्मः तथापि यस्त्वसौ शब्दज्ञाने विधिबोध्यत्वादुत्कृष्टः धर्मः तेन स दोषो निर्धानिष्यते भूयसा चाभ्युदयेन योगो भविष्यति । अधर्मस्तु वचनाबोध्यः विपरीतत्वमात्रेण कल्प्यः अल्पः । अयं च कूपखानकन्यायः मीमांसकैरप्यवश्यमभ्युपेयः । 'न हिंस्यात्सर्वाभूतानि' इति निषेधेन प्राणिहिंसया अधर्मः प्राप्नोति । यद्यपि यागीया हिंसा विधिबोधिता तथापि साधर्महेतुरेव । परन्तु कूपखानकन्यायेन यागानुष्ठानजनितो धर्मः हिंसाजन्याधर्मं नाशयेत् भूयसाभ्युदयेन योजयेच्च पुरुषम् । यागीयहिंसापि दुष्टैवेति नागेशैरुपपादितं द्रष्टव्यम् ।

इदमपरं प्रकरणं पस्पशाह्निके । शब्दा अर्थाः तत्संम्बन्धाश्च नित्याः । प्रयोगेऽर्थमर्थमुपादाय शब्दान् प्रयुञ्जते जनाः। एषां शब्दानां निष्पत्तौ यत्नः न क्रियते ये कार्याः पदार्थाः घटादयः तेषां निष्पत्तौ यत्नः क्रियते । नहि शब्दान् प्रयुयुक्षमाणः वैयाकरणकुलं गत्वाह कुरु शब्दान् प्रयोक्ष्ये इति । वैयाकरणकुलमगत्वैव शब्दान् प्रयुञ्जते, अतः शब्दार्थसम्बन्धा नित्या इत्यवगम्यते। तथा च अर्थज्ञानप्रयोजनेन कृते परस्य विशिष्टार्थबोधो भवत्विति शब्दस्य प्रयोगे, प्राप्ते शास्त्रेण धर्मनियमः क्रियते इति तत्र शास्त्रप्रयोजनमुक्तम्। अस्येयं प्रकृतिरयं प्रत्यय इत्यादि प्रकृत्यादिविभागज्ञानद्वारा गवादयः प्रयुक्ता धर्मजनकाः न गाव्यादयः इति शास्त्रेण नियमः क्रियत इत्यर्थः । तत्र लौकिका वैदिकाश्च दृष्टान्ताः प्रदर्शिताः । 'अभक्ष्यो ग्राम्यकुक्कुटः' 'अभक्ष्यो ग्राम्यसूकरः' इत्युच्यते। भक्ष्यं क्षुत्प्रतिघातार्थमुपादीयते । श्वमांसादिभिरपि क्षुत्प्रतिघातः शक्यः । तत्र नियमः क्रियते इदं भक्ष्यमिदमभक्ष्यम् इति । एवं क्रियमाणमभ्युदयकारीति। एवं वेदेऽपि

नियमः क्रियते यथा बैल्वः खादिरो वा यूपः इत्युच्यते । युपश्च पश्वनुबन्धार्थमुपादीयते । यत्किञ्चित्काष्ठमुच्छ्रित्या - नुच्छ्रित्य वा पशुरनुबन्द्धुं शक्यः । तत्र नियमः धर्मार्थः क्रियते । एवं अग्नौ कपालान्यधिश्रित्य मन्त्रयते-भृगूणामङ्गिरसां धर्मस्य तपसा तप्यध्वम्' इति । अन्तरेणापि मन्त्रमग्निर्दहनकर्माकपालानि सन्तापयति । तत्र नियमः क्रियते-एवं क्रियमाणमभ्युदयकारि भवतीति । अत एव मीमांसकैरुच्यते-मन्त्रैरेवाथः स्मर्त्तव्य इति नियमविधिरिति । प्रयोगसमवेतार्थस्मारकाः खलु मन्त्राः। एवमिहापि शब्देनापशब्देन चार्थावगतिः समाना तथापि शब्दैरेव अर्थोऽभिधेयः नापशब्दैरिति नियमः क्रियते। अयं च नियमः धर्मार्थः । "विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति" इति मीमांसकाः। सिद्धे सत्यारम्भो नियमायेति पातञ्जलाः ।

प्रयुक्तेषु साध्वसाधुषु प्रयुक्तसाध्वन्वाख्यानेन तेषु धर्मः, प्रयुक्तासाधुष्वधर्मः इत्युक्तम् । एवं च अप्रयुक्तानां अप्रयोगेणैवासाधुत्वा-नुमानादप्रामाण्यमित्यतः अप्रयुक्तान्वाख्यानमयुक्तमित्याशङ्क्य अप्रयुक्ते दीर्घसत्रवदनुविधेयाः इत्युक्तं पस्पशाह्निके । अत्र मीमांसकानुमतो दीर्घसत्रन्यायः समाश्रितः । दीर्घसत्राणि वार्षशतिकानि वार्ष साहस्रिकाणि च । न चाद्यत्वे कश्चिदाहरति । केवलं ऋषि सम्प्रदायो धर्म इति कृत्वा आधीयते याज्ञिकाश्च कल्पसूत्रेणान्वाचक्षते । एवमेवाप्रयुक्तानामपि साधुतया शास्त्राभिमतानामत एव प्रयोगयोग्यानां शास्त्रसम्प्रदाय इति कृत्वा शास्त्रसम्पत्यर्थं प्रकृतिप्रत्ययादि प्रदर्शनपुरस्सरं संस्कारः कर्तव्य एवेति भाष्यकारस्याभिप्रायः । यथा लक्षणमप्रयुक्ते इति वचनात्। अनिश्चितप्रयोगे शास्त्रानुगमः कर्तव्य इत्यर्थः । निश्चिताप्रयोगे तु शास्त्रस्याप्रवृत्तिरेव । नियमातिक्रमे कृते अपूर्वं परं न भवति । तथा च न धर्मलाभ इति यावत्। अत्र मीमांसान्यायः पतञ्जलिनाभ्युपत इति बोध्यम्।

आवृत्तिसंख्यानन्यायः

द्वितीये प्रत्याहाराह्निके शास्त्रस्य लक्ष्ये या प्रवृत्तिस्तदनुकूलोच्चारणे 'अस्य च्वौ' यस्येति चेत्यादौ सवर्णग्रहणं न स्यात् अनण्त्वात् इत्याशङ्कितम्। ये चाक्षरसमाम्नाये उपदिश्यन्ते ते एवाणः इति भावः। तत्र च यश्चाक्षरसमाम्नाये यश्चानुवृत्तौ यश्च धात्वादिस्थः सर्वोप्यकार एक एव सर्वध्वनिभिः एकस्य स्फोटस्यैव तत्तद्रूपेणाभिव्यञ्जनात् तत्तद्रूपाभिव्यक्तिकृतश्च परस्परं भेदव्यवहारः घटः करिः इत्यादौ अकारस्य इकारस्य वा एकत्वे द्व्यच्त्वं न स्यादित्याशङ्कायामुच्यते-एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात् अनेकाच्त्वं भविष्यति इत्युक्त्वा तत्र मीमांसान्याय एव भगवता उदाहृतः । तद्यथा-सप्तदश-सामिधेन्यो भवन्ति त्रिः प्रथमामन्वाह, त्रिरुत्तमामिति सप्तदशत्वं भवति । यथा विकृतियागे त्रयोदश सामिधेन्यः प्रथमोत्तमयोस्त्रिरावृत्त्य सप्तदशसम्पद्यन्ते एवं घटेन तरति घटिकः इत्यत्र द्व्यज्लक्षणष्ठन् सिध्यतीति भावः । तथापि किरिणेत्यादौ आवृत्तिभेदेऽपि मुख्यमेकाच्त्वमिकारस्यैकत्वादस्तीति एकाज्लणक्ष मन्तोदात्तत्वं स्यादिति दोषोऽपि लोकन्यायाश्रयणेन परिहृतः । तद्यथा ऋषिसहस्रमेकां कपिलां वित्तेन क्रीत्वा क्रीत्वा पुनर्दत्त्वा तया कपिलया सर्वे ते सहस्रदक्षिणाः सम्पन्ना इत्युच्यते । तेन ते गोसहस्रदानफला एव न त्वेकदानफला इति यथा व्यवहारः स्मृतौ तथा प्रकृतेऽपि अनेकाच्कत्वं भविष्यति।

कृन्मेजन्तः (१-१-३८) इति सूत्रे भाष्ये सन्निपातलक्षणोविधिरनिमित्तं तद्विघातस्येति परिभाषा अवतारिता । सन्निपातः संश्लेषस्तन्निमित्तो यो विधिः स तद्विघातस्य निमित्तं न भवति । तद्विघातस्य तादृशसन्निपातनाशस्य इत्यर्थः। रामायेत्यत्र अदन्तत्वसन्निपातलक्षणः यादेशः अदन्तत्वविघातस्य सुपि चेति दीर्घस्य निमित्तं न भवति । अतस्तत्र दीर्घो न स्यात् । परन्तु कष्टाय क्रमणे इत्यादिज्ञापकबलेन परिभाषाया अनित्यत्वमाश्रित्य तत्र रामायेति रूपं प्रसाधितम्। एवं बहुषु लक्ष्येषु परिभाषायाः प्रवृत्तौ दोषा उद्भाविताः ।

अतः पूर्वपक्षी शङ्कते परिभाषेयं नादरणीयेति । तदा भाष्यकारा एवमभिप्रयन्ति । न हि दोषाः सन्तीति कृत्वा परिभाषा न कर्तव्या लक्षणं वा न प्रणेयम् । न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते । न च मृगाः सन्तीति यवा नोप्यन्ते । दोषेषु प्रतिविधेयमिति। एवञ्च दोषाणां प्रति विधानेन बहुप्रयोजनैषा परिभाषा कर्तव्या। अयं न हि भिक्षुकाः सन्तीति न्यायः प्रसिद्धः। मीमांसायामपि क्वचित्क्वचिदयं न्याय आश्रीयत एव। अयं लोकव्यवहारसिद्ध उपजीव्यविरोधनिमित्तकः ।

अन्यार्थमपि प्रकृतमन्येन सम्बध्यते इति न्यायः । 'बहुगणवतुडतिसंख्याट' इति संज्ञाविधायके सूत्रे एकादिकायाः संख्यायाः संख्यासंज्ञासिध्यर्थं संख्याग्रहणं कर्तव्यम् । अन्यथा कृत्तिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः इति न्यायेन बह्वादीनां एव संख्यात्वेन ग्रहणमापद्येतेति वार्तिकमतमवतार्य संख्याया अतिशदन्तायाः कन् इति ज्ञापकात् एकादीनां संख्याग्रहणेन ग्रहणं प्रसाधितम् । तत उत्तरसूत्रे ष्णान्ता षट् इत्यत्र अनुवृत्यर्थं संख्याग्रहणं कर्तव्यमिति वार्तिकोक्तावुच्यते इदं प्रकृतमुत्तरत्रानुवर्तिष्यते । इदमिह संज्ञार्थम् । उत्तरत्र संज्ञिविशेषणार्थः । तदायमत्राक्षेपः-न चान्यार्थं प्रकृतमन्यार्थं भवति । न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद् भवति । न हि गोधासर्पन्ती सर्पणादहिर्भवतीति। तत्रेदं समाधानं-अन्यार्थमपि प्रकृतमन्यार्थं भवति । तद्यथा शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते, उपस्पृश्यते च, शाल्यश्च भाव्यन्ते । गोधादृष्टान्तस्तु द्रव्यविषयकाः । शब्दस्तु येन येन विशेषणेनाभिसंबध्यते तस्य तस्य विशेषको भवति । तथा च प्रकृते षान्ता नान्ता च संख्या षट्संज्ञा स्यादित्यर्थः सेत्स्यति । अयं चान्यार्थन्यायः मीमांसायामप्यभ्युपगत नैमित्तिकं विकारत्वात् क्रतुप्रधानमन्यत्स्यात् (मी. ४.३.४) इति सूत्रभाष्ये शबरस्वामिनायं न्यायः नैमित्तिकानि नित्यार्थे इति पूर्वपक्षप्रदर्शनावसरे प्रदर्शितः । तत्राचेदमप्युक्तं वाक्यानि द्विष्ठानि भवन्ति-श्वेतो धावति (श्वा इतो धावति) अलंबुसानां याता (बुसानां याता प्राप्तिकर्ता अल समर्थः) इति । भाष्येऽपि पस्पशाह्निके इदमुदाहृतम् एकेनैव वाक्येन

कः धावति? कीदृशो धावति इत्युभयोः प्रश्नयोरुत्तरम् - श्वेतो धावतीति। तथा केषां जनपदानां गन्ता? कः समर्थ इति द्वयोरेकेन वाक्येनोत्तरम्- अलंबुसानां यातेति । एवमन्यार्थं प्रकृतमिति न्यायः उभयत्रापि प्रपञ्चित इति द्रष्टव्यम् ।

प्रत्यासत्तिन्यायः

प्राग्रीश्वरान्निपाताः इति सूत्रे इदं चिन्त्यते अत्र रीश्वर इति किमर्थमुच्यते, ईश्वर इत्येव किं नोच्यते । केवलेश्वरशब्दग्रहणे ईश्वरे तोसुन्कसुनौ इत्येतत्पर्यन्तं निपातपदाधिकारः स्यात् अधिरीश्वरे इत्येतत्पर्यन्तमेवास्याधिकारोऽस्तु इति कृत्वा रेफ विशिष्ट ग्रहणमित्युक्तम् । तत्र भगवान् एवं प्रतिवदति-आवनान्ताद् ओदकन्तात् प्रियं पान्थमनुव्रजेदिति समुदाचारः । तत्र प्रथमो यो वनान्तः उदकान्तो वा तावदेवानुव्रज्यते पान्थः । तथैवात्रापि प्रथमेश्वरशब्दपर्यन्तमेव निपातपदाधिकारः न तु ततोऽप्यनन्तरम् । तत्र प्रत्यासत्तिन्यायः आश्रितः । प्रत्यासत्तिर्नाम सामीप्यम् । ईश्वरपदेन समीपस्थमेव गृह्येत न तु विप्रकृष्टम् । अतो रेफोच्चारणं नावश्यकमिति । मीमांसायामप्ययं न्यायः समाश्रयणीयः । तथा हि - कपिञ्जलानालभेत इति विधिः । तत्र कपिञ्जलानिति बहुवचनश्रुत्या सर्वेषां कपिञ्जलानामालम्भनं कर्त्तव्यं स्यात् व्याप्तिन्यायाश्रयणे। तच्चाशक्यम्। अतोऽत्र प्रत्यासत्तिन्यायाश्रयणेन त्रयाणामेव कपिञ्जलानामलंभनमिति स्वीक्रियते तावता च कपिञ्जलानिति बहुवचनश्रुतिश्चरितार्थास्यादिति। अयं प्रत्यासत्तिन्यायः लक्ष्यानुरोधादाश्रायणीयः इति भाष्यमतम्। क्वचित्तु व्यप्तिन्यायोऽप्याश्रयणीयः। यथा वृद्धिरादैजित्युच्यते। अत्र प्रत्यासत्तिन्यायाश्रयणे वृद्धिपदेन भावितानामादैचामेव वृद्धिसंज्ञा स्यात्। तथा सति शालामालादिगतानामाकाराणां वृद्धिशब्देन भावितत्वाभावात् न वृद्धिसंज्ञा स्यात्। तथा च "वृद्धिर्यस्याचामादिस्तद्वृद्धम्" इति वृद्धसंज्ञा न स्यात् 'वृद्धाच्छः' इति छोऽपि न स्यात्। शालीयादीष्टरूपासिद्धिश्चापद्येत। अतस्तत्र व्याप्तिन्यायाश्रायणेन

सर्वेषामादैचां वृद्धिसंज्ञा अभ्युपगन्तव्या। लक्ष्यानुरोधान्न्यायाश्रयणमिति बोध्यम्।

योगाद्रूढिर्बलीयसीतिन्यायः

रथकारोऽग्नीनाधीतेति पठ्यते।तत्र रथकारशब्दः रथं करोतीति योगाश्रयणेन ब्राह्मणादिवाचको वा रूढ्या रथकाराख्यजातिविशेषवाचको वेति विचारे योगाद्रूढिर्बलीयसीति न्यायेन रूढ्यर्थ एव ग्राह्यः इत्युक्तम्। रूढिर्नाम प्रकृतिप्रत्ययार्थानपेक्षया प्रसिद्ध्या शाब्दबोधजनकशब्दत्वम्। प्रायः सर्वे संज्ञाशब्दाः रूढाः। अतः प्रकृते रथकारशब्देन रूढ्या सङ्करजातिविशेष एव ग्राह्यः न तु प्रकृतिप्रत्ययार्थ पुरस्कारेण रथकर्ता ब्राह्मणादिरिति सिद्धम्। अयं न्यायः 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' इत्येतन्न्यायमूलकः। 'बहुगणवतुडतिसंख्या' इति सूत्रे संख्याग्रहणाभावे एकादीनां संख्यानां संख्या न स्यादित्याकितम्। एकादिकाः अकृत्रिमाः संख्याः बह्वादयश्च कृत्रिमाः। कृत्रिमशब्देन रुढ्यर्थो ग्राह्यः गोपालकमानय, कटजकमानय इत्युक्ते यस्यैषा संज्ञा स एवानीयते न यो गाः पालयति, यो वा कटे जातः इति भाष्यवचनमत्र श्रद्धेयम्। तत्र यौगिकार्थो न गृह्यते। किन्तु रूढ्यर्थ एव। प्रकरणमत्र नियामकं वेदितव्यम्। जननीवाची मातृशब्दः रूढः। परिच्छेत्तृवाचि मातृशब्दश्च तृजन्तः यौगिकः। 'योगाद्रूढिबलीयसी इति न्यायात् ' न षट्स्वस्रादिभ्यः' इति ङीप् निषेधः स्वस्रादिगणपठितस्य जननीवाचिनः मातृशब्दस्यैव,न तु यौगिकस्य। तत्र तु स्त्रियां ङीपि मात्री इति रूपम्। एवमन्यत्रापि योगरूढ्योःरूढेरेव बलीयस्त्वं बोध्यम्।

तादर्थ्यात् ताच्छब्द्यमिति न्यायः-'प्रथमानिर्दिष्टं समास उपसर्जनम्' 'एकविभक्तिचापूर्वनिपाते' इति सूत्रद्वयेन उपसर्जनसंज्ञा विधीयते। तत्र प्रथमसूत्रे समासे इत्यस्य समासविधायक शास्त्रे इति द्वितीयसूत्रेऽनुवर्तमानस्य समास इत्यस्य विग्रहवाक्ये इत्यर्थः। समासार्थः विग्रहोऽपि समास इत्युच्यते। तदर्थस्य वस्तुनः तच्छब्देन लोके व्यवहारः दृश्यते। आयुरर्थं घृतमायुरित्युच्यते आयुर्घृतमिति। एवं

प्रकृतेऽपि समासार्थं विग्रहवाक्यमपि समासशब्देन निर्दिश्यते। अयं प्रायः सर्वैरङ्गीक्रियते। इन्द्रार्था स्थूणाः इन्द्रशब्देन वेदेऽपि व्यवह्रियते। अतोऽयं न्यायः मीमांसकानामप्यभिमत एव।

भाविसंज्ञाविज्ञानन्यायः

इग्यणः संप्रसारणमिति सूत्रे इग्यो यणः स्थाने स संप्रसारणसंज्ञो भवति इति वर्णसंज्ञा पक्षे इतरेतराश्रयदोष उद्भावितः। स च सिद्धं तु नित्यशब्दत्वादिति परिहृतम्। अत्रेतरेतराश्रयस्य वैलक्षण्यं प्रदर्श्य दोषस्य तादवस्थ्यमुक्तम्। तदेदं समाधानम्-एवं तर्हि भाविनीयं संज्ञा विज्ञास्यते। तद्यथा - कश्चित् कञ्चित्तन्तुवायमाह- अस्य सूत्रस्य शाटकं वयेति। स पश्यति 'यदि शाटको न वातव्योऽथवातव्यो न शाटकः, शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी संज्ञा अभिप्रेता, मन्ये स वातव्यः यस्मिन्नुते शाटक इत्येतद्भवतीति। एवमिहापि स यणः स्थाने भवति यस्याभिनिर्वृत्तस्य संप्रसारणमित्येषा संज्ञा भविष्यतीति। मीमांसायामपि ''यवागूं पचतीत्यादौ भाविसंज्ञाविज्ञानन्यायः समाश्रयमीय एव पक्वायां यस्यां यवागूसंज्ञा भविष्यति सा पचनीयेति।

अगतिकगतिन्यायः

सोमेन यजेत इत्यत्र सोमपदे मत्वर्थलक्षणा आश्रीयते सोमवता यागेनेष्टं भावयेदिति विशिष्टविधिस्तत्राभ्युपगम्यते। गुणविधित्वं च न संभवति यागस्याप्तत्वात्। वस्तुतःलक्षणा जघन्या वृत्तिः सा चात्र अगत्या स्वीकर्तव्या। अन्यथा वाक्यमिदमनर्थकं स्यात्। यावच्छक्यं मत्वर्थलक्षणा परिहरणीया। अत एव मत्वर्थलक्षणाभयात् "उद्भिदा यजेत पशुकामः" इत्यत्र उद्भिच्छब्दस्य कर्मनामधेयत्वमभ्युपगम्यते। एवं वाक्यभेदोऽपि दोषः। वाक्यभेदभयादेव 'चित्रया यजेत पशुकाम' इत्यत्र चित्राशब्दस्य कर्मनामधेयत्वमुच्यते। उक्तञ्च मीमांसकैः-

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।
अप्राप्तेतु विधीयन्ते बहवोऽप्येकयत्नतः।। इति।

एवञ्च वाक्यभेदमत्वर्थलक्षणादिकं गौरवावहमपि क्वचिदगत्यन्तराभावात् स्वीकार्यमेव। वैय्याकरणा अपि न्यायमिमं स्वीकुर्वन्ति। "हलः श्नः शानज्झौ" "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इत्यादौ क्त्वः श्नः इत्यादीनां साधुत्वसंपादनाय "आतो धातोः" इत्यत्र आतः योगविभागः आगत्या आश्रीयते। धूमादग्निमान् नास्ति घटोऽनुपलब्धेः' इत्यादौ हेतौ पञ्चमीं साधयितुं 'विभाषागुणेऽस्त्रियाम्' इत्यत्र विभाषेति योगो विभज्यते। दात्रेण लूनवान्, करेण स्पृष्टवान् इत्यादौ 'कर्तृकर्णे कृताबहुलम्' इति समासवारणं च बहुलग्रहणेन समाधीयते। एवं क्वचिद्बहुलग्रहणेन, क्वचिद्योगविभागेन, क्वचिच्चाकृतिगणत्वाभ्युपगमेन प्रयोगाणां साधुत्वं व्यवस्थापयन्तः वौय्याकरणाः अगतिकगतिन्यायानुगामिन इत्यवश्यमभ्युपेयम्। भाष्यकारः पतञ्जलिः न्यायमिममर्थतोऽनुमोदते इति वक्तुं शक्यते।

आकृत्यधिकरणन्यायः

मीमांसकाः पदानां जातावेव शक्तिमभ्युपगत्छन्ति। नैयायिकास्तु "जात्याकृतिव्यक्तयः" पदार्थः इति जातिविशिष्टव्यक्तावेव शक्तिं व्यवस्थापयन्ति। आकृत्यधिकरणे गवादिपदानां जातौ गोत्वादौ शक्तिरिति विशिष्टशक्तिवादं निरस्य उपपादितम्। नागृहीतविशेषणा बुद्धिर्विशिष्टेषूपजायते "न ह्यप्रतीते विशेषणे विषिष्टं केचन प्रत्येतुमर्हन्ति" इत्यतः प्रथमतः विशेषणे शक्तिरभ्युपेया। तेन च विशेषणबुद्धिः। ततः विशिष्टबुद्धिसंपादनाय विशेष्ये शक्तिः स्वीकार्या। विशेषणबोधनेन क्षीणशक्तिरभिधा विशेष्यं बोधयितुं नालम्। अतः द्वितीया शक्तिः (अभिधा) इति वक्तव्यम्। एवं शक्तिद्वयकल्पनायां गौरवम्। अतः पदानां जातावेव शक्तिः। व्यक्तिबोधस्तु आक्षेपाल्लभ्येत। दिवा अभुञ्जानस्य देवदत्तस्य पीनत्वान्यथानुपपत्त्या यथा रात्रिभोजनमाक्षिप्यते एवं व्यक्तिं विना जातेरवस्थित्यनुपपत्त्या जात्या व्यक्तिराक्षिप्यते। एतत्सर्वमाकृत्यधिकरणे प्रकाशितम्। पतञ्जलिनातु पस्पशाह्निके इदं विचारितम्-किं पुनराकृतिः पदार्थः आहोस्विद् द्रव्यम् इति पृष्ट्वा

उत्तरयति उभयनित्याहेति । आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् इति सूत्रितं पाणिनिना। द्रव्यं (व्यक्तिं) पदार्थमभ्युपगम्य सरूपाणामेकशेषं एकविभक्ताविति एकशेषो विधीयते। जातेरेकत्वादेकवचनमेव प्रसक्तम्। तत्र विकल्पेन बहुवचनं विधीयते। यथा गुरुः पूज्यः गुरवः पूज्याः। तथा व्यक्तीनामनेकत्वात् अनेकेषां शब्दानां प्रयोगः प्रसक्तः। तत्र चैकशेषः । यथा घटश्च घटश्च घटश्च घटाः इति । पातञ्जलाः लक्ष्यानुसारेण क्वचिज्जातिं क्वचिच्च व्यक्तिं पदार्थं मन्यन्ते। अयं चाकृत्यधिकरणन्यायानुसारीति वक्तुं न शक्यते। अत्र च वैलक्षण्यं बोध्यम्।

अन्तरेणापि वतिं तदर्थो गम्यते इति न्यायः। तेन तुल्यं क्रिया चेद्वतिः इति सूत्रेण तेन तुल्यमित्यर्थे वतिर्विहितः। शिष्यः गुरुवदध्यापयति-गुरुणा तुल्यमध्यापयतीत्यर्थः। परन्तु क्वचित् वतेरप्रयोगेऽपि तदर्थो गम्यते। मुखं चन्द्रःइत्युच्यते। अचन्द्रं चन्द्रमाह। चन्द्रवदिति गम्यते। एवं 'गोतो णित्' इति गोशब्दात्परं सर्वनामस्थानं णिदित्युच्यते। अणित् णिदाह। णिद्वत् इत्यर्थो गम्यते। अत्र णिद्वत्त्वातिदेशेन णित्कार्यं अचोञ्णिति इत्यादिवृद्ध्या-दिकमतिदिश्यते। एवं गाङ्कुडादिभ्योऽञ्णिन्ङित्, असंयोगाल्लिट् कित्, सार्वधातुकमपित् इत्यादावपि द्रष्टव्यम्। मीमांसायामपि अयं न्यायः प्रवर्तते। आदित्यो यूपः यजमानः प्रस्तरः इति वति विनापि तदर्थो गम्यते । तत्राप्यतिदेशः सुग्रहः।।

निषादस्थपत्यधिकरणन्यायः

श्रूयते 'निषादस्थपतिं याजयेदिति' । अत्र सन्देहः निषादानां स्थपतिः निषादस्थपतिरिति षष्ठीतत्पुरुषः उत निषादश्चासौ स्थपतिश्चेति कर्मधारयः इति। षष्ठीतत्पुरुषः एव न्याय्यः, तथा सति निषादानां स्थपतिः ब्राह्मणादिर्भवितुमर्हति, तथा सति तस्य याजनं श्रुतिसंगतं स्यात्। कर्मधारय परिग्रहे तु निषादस्य वर्णसंकरनिष्पन्नस्य याजनं न समीचीनं स्यात्। स्त्रीशूद्रादीनां वेदाध्यनानधिकारत्वात् इति

पूर्वपक्षे अत्र कर्मधारय एवाश्रयणीयः लाघवात्। षष्ठीसमासपरिग्रहे निषादशब्दे लक्षणा वक्तव्या स्यात् 'निषादशब्दस्य निषादसन्बन्धिनि लक्षणेति' । अन्यथा निपातारिक्तनामार्थ-योरभेदेनान्वयात् निषादाभिन्नस्थपतिरित्यर्थ आपद्येत। तच्च अनिष्टम्। अतः लक्षणास्वीकाररूपगौरव परिहाराय कर्मधारय एवाश्रयणीयः। न चैवं वेदाध्ययनानधिकारिणः याजनमसंगतमिति वाच्यम् एतद्विधिबलादेव तस्य तदनुरूपाध्ययनाधिका-रस्यावगमात्। रथकारोऽग्नीनादधीत इत्यत्रापि संकरजातेः अग्न्याधानाधिकारः यथा उपपादितस्तथैवात्रापि निषादस्य यजनाधिकारः अभ्युपगम्यते। फलमुखगौरवस्यादोषत्वादिति मीमांसकाः। पतञ्जलिरपि तत्र योगविभागादिना प्रयोगसाधुत्वं संपादयन् फलमुखगौरवं न दोषायेति स्वाभिप्रायं सूचयत्येव। गौरवलाघवचर्चा तत्रैव यत्र गौरवं न फलमुखम्। योगविभागादिकं गौरवावहमपि पदसाधुत्वानुशासनफलकमिति आदरणीयमेवेति भावः।

तत्स्थानापन्नस्य तद्धर्मलाभन्यायः

तत्स्थानापन्नस्य तद्धर्मलाभो लोकवेदयोः सिद्ध एव। लोके तावदेकस्मिन्नुपाध्याये मृते तत्स्थाने निविष्टस्याप्यभिवादनाद्युपाध्यायधर्मलाभो भवति। एकस्मिंश्च राजनि प्रोषिते तत्स्थानेऽभिक्तिस्य तत्पुत्रादेरपि तद्धर्मलाभो भवति। वेदेऽपि अयं न्यायः अभ्युपगतो दृश्यते। ब्रीहिभिर्यजेत्युच्यते। तत्स्थाने सौर्येष्टौ नीवारः गृह्यन्ते । तेऽपि ब्रीहिधर्मान् लभन्ते। कुशानां स्थाने गृह्यमाणाः शराः कुशधर्मान् लभन्ते। एवं न्यायोऽयं पतञ्जलिना स्वीकृतः ब्रूस्थानापन्नो वचिःअस्तिस्थानापन्नो भूः 'अजेर्व्यघञपोः' इति अजिस्थानापन्नो वीः इत्येवमादयः ब्रूवादिधर्मान् धातुत्वादीन् लप्स्यन्ते। पादादिस्थानमापन्नः पदादयोऽपि पादादिधर्मान् प्रातिपदिकत्वादिधर्मान् प्राप्स्यन्ते। एवञ्च न्यायोऽयं व्याकरणे मीमांसायां च समादृतो दृश्यते। अयं न्यायः यो यस्य प्रसङ्गे भवति लभतेऽसौ तत्कार्याणि।उपाध्यायस्य शिष्यः याज्यकुलानि गत्वा उपाध्यायकार्याणि अग्रासनादीनि प्राप्नोति इत्यनेन

तनाम इत्यपि बोध्यम्। अयं स्थानिवदादेशोऽनल्विधौ इति सूत्रभाष्ये बहुधा प्रपञ्चितः।

सोमपूतीकतृणन्यायः

स्थानिवत्सूत्रे भाष्येऽयं न्यायः प्रपञ्चितः। स्थानी हि नाम यो भूत्वा न भवति। आदेशो नाम अभूत्वा भवति। एतच्च नित्येषु शब्देषु नोपपद्यते यत्सतो नाम विनाशः स्यादसतो वा प्रादुर्भावः । सिद्धं तु यथा लोकिकवैदिकेषु अभूतपूर्वेऽपि स्थानशब्दप्रयोगात्। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु अभूतपूर्वेऽपि स्थानशब्दः प्रयुज्यते। लोके तावदुपाध्यायस्य स्थाने शिष्य इत्युच्यते। अत्र चोपाध्यायः न भूतपूर्वः । वेदेऽपि सोमस्य स्थाने पूतीकतृणान्यभिषुणुयादित्युच्यते। न तत्र सोमो भूतपूर्वः। तत्रोपाध्यायः प्रथमं नासीत्, तस्य निवर्तनेन शिष्यो न नियुक्तः। यत्र उपाध्यायः कर्म कुर्वन्नासीत् तत्रेदानीं शिष्यः अध्यापनादिकार्यं करिष्यतीत्येवाभिप्रायः । तथैव वेदवचनस्यायमभिप्रायो न यत्प्रथमं सोमलता आसीत् तां ततो निवर्त्य पूतीकतृणानि आनेयानीति । अत्र सोमलतया यद्यत्कार्यं पूर्वमासीत् तत्तत्कार्यमिदानीं पूतीकतृणैः कार्यमित्येव तात्पर्यम्। तथा प्रकृते इकोयणचीत्युक्ते इकारं निवर्त्य यकारो भवतीति नार्थः किन्तु यत्र इकारे पूर्वं कार्यमासीत् तत्रेदानीं यकारेण कार्यं कर्तव्यमित्येव तात्पर्यम्।

इतरेतराश्रयन्यायः

सतामदैचां संज्ञाया भवितव्यम्। संज्ञया चादैचो भाव्यन्ते। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि कार्याणि न प्रकल्पन्ते। तद्यथा नौर्नाविबद्धा नेतरत्राणाय भवति। इतरेतराश्रयाद्वाक्यार्थाप्रसिद्धिः। एवं बहुषु स्थलेषु इतरेतराश्रयत्वं प्रकाशितं समाहितञ्च। मीमांसायामपि न्यायोऽयं स्वीकृतो दृश्यते। अपूर्वं कल्पयित्वा फलमवगम्येत, फलं च कल्पयित्वापूर्वम्। एवमितरेतराश्रयं भवति। इतरेतराश्रयाणि कार्याणि न प्रकल्पन्ते इति शबरस्वामिना भाष्ये चतुर्थाध्याये तृतीये पादे दशमसूत्रव्याख्यावसरेऽस्योल्लेखः कृतो दृश्यते । प्रायः सर्वेषु दर्शनेषु

आत्माश्रयान्योन्याश्रयचक्रकादयो दोषाः यथावसरमुट्टङ्किताः सन्तीति बोध्यम्।

शिष्टाशिष्टाप्रतिषिद्धानुकरणन्यायः

शिष्टस्यानुकरणमभ्युदयाय, अशिष्टाप्रतिषिद्धस्यानुकरणं नैवदोषाय नाप्यभ्युदयाय, प्रतिषिद्धानुकरणन्तु दोषायैव कल्पते। तत्र लौकिकाःवैदिकाश्च दृष्टान्ताः भाष्यकारेण प्रदर्शिताः। लोके तावत् यः एवमसौ ददाति, य एवमसौ यजते. य एवमसौ अधीते इति तस्यानुकुर्वन् दद्यात्, यजेत अधीयीत च सोऽप्यभ्युदयभाग्भवति। वेदेऽपि य एवं विश्वसृजं सत्राण्यध्यासते इति तेषामनुकुर्वन् तद्वत्सत्राण्यध्यासीत सोऽप्यभ्युदयेन युज्जेत। अशिष्टाप्रतिषिद्धं यथा-य एवमसौ हिक्कति, य एवमसौ हसति, य एवमसौ कण्डुयतीति तस्यानुकुर्वन् हिक्केच्च, हसेच्च, कण्डूयेच्च नैव दोषाय स्यान्नाभ्युदयाय। प्रतिषिद्धानुकरणं यथायस्तु खल्वेवमसौ ब्राह्मणं हन्ति, एवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात्सुरां पिबेत् सोऽपि पतितः स्यात्। दुष्टानुकरणं दुष्टमेवेति तात्पर्यम्। अत्र हन्ता अनुहन्ता चेत्युभावपि हननं कुरुतः पाता अनुपाता चेत्युभावपि पिबतः। अतोऽस्य दुष्टत्वम् । यस्तु स्वस्थचित्तः सर्वेषां पुरतः अनुकुर्वन् कदलीस्तम्भं छिन्द्यात् पयो वा पिबेत् स न पापभाक् भवति, ब्राह्मणहननसुरापानयोस्तत्राभावात्। एवमनुकरणं क्वचिद्दोषाय, क्वचिदभ्युदयाय, क्वचित्तु न दोषाय नाप्यभ्युदयायेति सिद्धम्। अयं न्यायोऽपि मीमांसकैरभ्युपेय एव।

अव्यपवृक्तावयवन्यायः

वर्णैकदेशानां वर्णग्रहणेन ग्रहणमस्ति न वेति विचारःप्रकरणम् वर्णग्रहणेन ग्रहणे गुणान् दोषांश्चोद्भाव्य सर्वदोषपरिहारायेदमुच्यते नाव्यपवृक्तस्य अवयवे तद्विधिर्यथा द्रव्येषु इति। अभिन्नबुद्धिविषयस्य एकत्वालम्बनज्ञानग्राह्यस्य योऽवयवः तस्मिन् पृथक्भूतवर्णविधिः न भवतीत्यर्थः। सप्तदशसामिधेन्यो भवन्तीत्युच्यते। सामिधेनी शब्दः ऋच्

वाचकः साहचर्यात्काष्ठेषु दत्तं सप्तदशहस्तं काष्ठे सप्तदशकाष्ठानीति बुद्धेरभावात् न सप्तदशारत्निमात्रं काष्ठमग्नावभ्याधीयते। यद्यपि एकैका समिदरत्निमात्रमिति मिलितानां सप्तदशानां समिधां सप्तदशारत्निमात्रत्वं भवति। तथापि अभिन्नबुद्धिविषयसमुदायावयवत्वान्न व्यपवृक्ताश्रयकार्यप्रसङ्गः । व्यपवृक्तं भेदः। किञ्च तैलं न विक्रेतव्यम्, मांसं न विक्रेतव्यमित्युच्यते । व्यपवृक्तं तैलं मांसं वा न विक्रीयते । परन्तु अव्यपवृक्तंगावः सर्षपाश्च- विक्रीयन्ते तत्र न निषेधः प्रवर्तते । अभिन्नबुद्धिविषयत्वात्समुदायस्य । एवं लोमनखं स्पृष्ट्वा शौचं कर्तव्यमित्युच्यते । व्यपवृक्तं- भिन्नबुद्धिविषयं स्पृष्ट्वा नियोगतः कर्तव्यम् । अव्यपवृक्ते कामचारः तेन शौचाभावः । एवं प्रकृते दीर्घप्लुतादिषु अकारादिषु एकत्वालम्बनज्ञानग्राह्यत्वेनाभिन्नबुद्धिविषयत्वात् समुदायस्यावयवे वर्णविधिः न भवति। अयं च न्यायः मीमांसायां मुख्यतया आश्रयणीय इति सामिधेन्यादिदृष्टान्तैः स्पष्टं भवति ।

प्रकरणापेक्षया श्रुतेर्बलवत्त्वन्यायः मीमांसायां श्रुतिलिङ्गवाक्य प्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् इति पठ्यते । तत्र श्रुतिः प्रबलं प्रमाणं, परं परं दुर्बलम् । तत्र चार्थविप्रकर्षो हेतुः । श्रुतौ साक्षादङ्गत्वबाधकः शब्दोऽस्ति । अन्यत्र लिङ्गादिबलाद् अङ्गत्वमनुमीयते। प्रकृते च प्रकरणापेक्षया श्रुतेः प्राबल्यमुच्यते । प्रकरणात् समभिव्याहार रूपवाक्यकल्पना, ततो लिङ्गकल्पना, ततः श्रुतिकल्पना इति अङ्गत्वबोधः विलम्बेनैव भवति । श्रुत्या तु झटिति अङ्गत्वप्रतीतिः इति मीमांसकसमयः । एतन्मूलकमेव श्रुतानुमितयोः श्रुतं बलीय इति न्यायोऽपि । अयं च न्यायः वैयाकरणैरप्यभ्युपगम्यते । नपुंसकस्य झलचः इति सूत्रे शेखरकारः नपुंसकस्येति गृह्यमाणस्यान्यस्याभावादङ्गस्यैव विशेषणम् । अस्थिदधिसक्थ्यक्ष्णामनङुदात्त इत्यादौ गृह्यमाणस्य दध्यादेरेव विशेषणं, प्रकरणापेक्षया श्रुतेर्बलवत्वादिति । यद्यपि अङ्गस्येत्यधिकारात् अङ्गमेव प्रकरणम्, अतः अङ्गस्य प्राधान्ये सत्येवानङ् भवेत् तथापि

प्रकरणं प्रबाध्य श्रुत्या दध्यादीनां प्राधान्ये एवानङ्‌ न तु अङ्गस्य प्राधानतयामिति मीमांसान्यायमवलम्ब्य व्यवस्थापितं बोध्यम् ।

पर्जन्यवर्षणन्यायः

(पर्जन्यवल्लक्षणप्रवृत्तिः) 'इको झल्' इति सूत्रे भाष्ये निनीषतीत्यादौ नी इति दीर्घस्य दीर्घविधानं व्यर्थमिति वदन्नाह भाष्यकारः- न हि दीर्घाणां दीर्घाः प्राप्नुवन्ति किं कारणम् न हि भुक्तवान् पुनर्भुङ्क्ते; कृतश्मश्रुश्च श्मश्रूणि कारयति। ननु च पुनः प्रवृत्तिर्दृष्टा । भुक्तवानपि पुनर्भुङ्क्ते कृतश्मश्रुश्च श्मश्रूणि कारयति। सामर्थ्यात् पूनः प्रवृत्तिर्भवति भोजनविशेषात् शिल्पिविशेषाद्वा। दीर्घाणां पुनर्दीर्घवचने न किमपि प्रयोजनमस्ति । अकृतकारि खल्वपि शास्त्र पर्जन्यवत् । तद्यथा पर्जन्यो यावदूनं पूर्णं च समभिवर्षति । पर्वते वा समुद्रे वा कृषिभूमौ वा । क्वचिद्वृष्टेः प्रयोजनं क्वचिच्च न स्यात् । तथापि सर्वत्र ऊने पूर्णे च वृष्टिर्भवत्येव। एवं शास्त्रमपि सति निमित्ते सर्वत्र प्रवर्त्तत एव । 'गौरीणाम्' इत्यादौ प्रयोजनाभावेऽपि दीर्घस्य दीर्घः स्यादेव । रामाणाम्, हरीणामित्यादौ तु 'नामि' इति दीर्घप्रवृत्तिः आवश्यकी । एवं 'नामि' इति अजन्तस्य सर्वत्र दीर्घः भवत्येव । निनीषाते इत्यादौ दीर्घविधानं सार्वधातुकार्थधातुकयोरिति गुणबाधानार्थमिति वक्तुं शक्यते । न्यायोऽयं मिमांसासम्मतः शुचेरपि शुचित्वं मन्त्रादिना क्रियत एव । अतः तत्रापि पर्जन्यवर्षणन्यायः अभ्युपेयते ।

क्षीरोदकसंपर्कन्यायः

न्यायोऽयं तस्यादित उदात्तमर्धह्रस्वमिति सूत्रभाष्येऽवतारितः। आमिश्रीभूतमिवेदं भवति । तद्यथा लोके क्षीरोदके संपृक्ते आमिश्रीभूतत्वान्न ज्ञायते कियत् क्षीरं कियदुदकमिति, कस्मिन्नवकाशे क्षीरं, कस्मिन्नवकाशे उदकमिति च । एवमिहापि आमिश्रीभूतत्वान्न ज्ञायते कियदुदात्तं, कियदनुदात्तमिति अस्मिन्नवकाशे उदात्तम्,

अस्मिन्नवकाशेऽनुदात्तमिति चेति, अतः तस्यादित अर्धमुदात्तमिति वचनमावश्यकमिति भाष्यतात्पर्यम् । आमिश्रवणं त्रिप्रकारम् । तत्र प्रथमम्-पदार्थद्वयमपि स्वरूपपरित्यागेन 'गङ्गोदकवद्वा' 'पांसूदकवद्वा' नवं रूपं गृह्णाति । द्वितीयं यथा-क्षीरोदकवत् एकमपरस्य स्वरूपं गृह्णाति । तृतीयन्तु तिलोदकवत् मिश्रणेऽपि पदार्थद्वयं स्वं स्वं रूपं न त्यजति । सुरेशः इति प्रथमस्य हरेऽव इति द्वितीयस्य हरी एतौ इति तृतीयस्य चोदाहरणं बोध्यम् । अयमपि न्यायः मीमांसासम्मत एव ।

एवमनेके न्यायाः पतञ्जलिभाष्यगताः मीमांसादर्शनगताश्च सन्ति । तक्रकौण्डिन्यन्यायः, नष्टाश्वदग्धरथन्यायः पङ्ग्वन्धन्यायः, सिकतातैलन्यायः, ब्राह्मणभोजनन्यायः, लट्वानुकर्षणन्यायः, वृश्चिकभियान्यायः, एकाक्रिया द्वयार्थकरीन्यायः, द्रव्योपचारन्यायः, शकुनिदर्शनन्यायः, आदित्यदर्शनन्यायः, इत्येवामादयः सहस्रशो न्यायाः तत्र भाष्यकारेण मीमांसाकारेण च उट्टङ्किताः प्रपञ्चिताः दृश्यन्ते । तेषां सर्वेषां चयनं समीक्षणञ्च नाल्पश्रमसाध्यं, नापि प्रबन्धनिवेशानुकूलञ्च ।

ANYĀPADEŚAŚATAKA

Editor : Dr. P. VISALAKSHY

Anyāpadeśaśataka as the title itself indicates is a work containing hundred verses. These verses depict essential principles of life indirectly through something else. There are many works entitled Anyāpadeśa. Krishnamacariar refers four such works in Sanskrit literature. They are of Nīlakaṇṭha, Jagannātha, Gaṇapati Śāstri and Ghanaśyāma.[1] Three other works, the titles of which begin with Anyāpadeśa can be seen in Kerala. One among the three is Anyāpadeśa by Kochunni Thampuram of Kodungalloor. This might be a Malyalam work.[2] The second one is Anyāpadeśasaptati consisting of seventy two verses by Ilattur Ramasvami Shastri written by the instructions of Ayilyam Thirunal Maharaja of Travancore.[3] The third one entitled Anyāpadeśaśataka is authored by Ravivarma Thampuran of Kadathanadu.[4] In the Oriental Research Institute and Manuscripts Library there is a manuscript in Grantha characters entitled

---

[1] History of classical Sanskrit literature, P.

[2] Kerala Sanskrit Literature – A Bibliography, p.142; Kerala Sāhitya Caritram Vol. IV, p.354.

[3] Kerala Sanskrit Literature – A Bibliography, p.142. Also see Vijñānadipīkā, Vol. III, pp. 307-311

[4] Printed at Sreekrishna Vilasam Press, Tanjore, For details see Contribution of Kerala to Sanskrit Literature.

Anyāpadeśaśataka (Ms. No. 5499-A) in which the author's name is not mentioned.[5]

The present work Anyāpadeśaśataka is of Nīlakaṇṭha Dīkṣita as evidenced from the Colophon –

"iti nīlakaṇṭhadīkṣitena viracito anyāpadeśaśataka samāptaḥ".[6]

In another manuscript the details of the author are given as – "iti śrībharadvājakulajaladhikaustubhaśrīkaṇṭhamatapratiṣṭhāpanācārya caturadhikaśataprabandhanirvāhaka śrīmahāvratayāji śrīmadappayyadīkṣitasodarya śrīmadāccādīkṣitapautreṇa śrīnārā-yaṇadīskṣitāmajena śribhūmīdevīgarbhasambhavena śrīnīla-kaṇṭhadīkṣita viracitā anyāpadeśaśatakam sampūrnam.[7]

It shows that the author Nīlakaṇṭha Dīkṣita belongs to Bharadvājagotra, founder of Śrīkaṇṭha philosophy, composer of four hundred prabandhas, grandson of Āccā Dīkṣita, the brother of Appayya Dīkṣita and the son of Nārāyaṇa Dīkṣita and Bhūmīdevi. Dr.Kunjunni Raja agrees to the view that Nīlakaṇṭha Dīkṣita is the grandson of the brother of Appayya Dīkṣita.[8] (1520-1593). According to him Varṇanāsārasaṅgraha is written by one Nīlakaṇṭha Dīkṣita and in this context he states that Nīlakaṇṭha Dīkṣita is the son of Appayya Dīkṣita II and Kāmākṣī. This

---

5 This work is different from the Anyāpadeśaśataka of Nīlakaṇṭha Dīkṣita.

6 Ms. No. 20680 (क)

7 Ms. No. 2449-A (ख). This work scrutinised by Kerala Varma Valia koil Thampuran was printed in 1886 at the instance of Ramavarma Maharaja.

8 Contribution of Kerala to Sanskrit Literature, p. 68

Nīlakaṇṭha Dīkṣita was a poet in the court of Karthika Thirunal Maharaja of Travancore and the king gave him the title 'Prabandhasāgara.' He was also known as Ayyā Dīkṣita. Raja's opinion in this regard is based on the colophon found in a manuscript of Varṇanā Sārasaṅgraha which is kept in the Adyar Library. This colophon reads as – "iti śrīmadbharadvājakulajaladhikaustubha śrīmadappayyadīkṣita vamśyena appayyadīkṣitātmajena Kāmākṣīgarbhasambhavena nānādeśasthitanānāślokasamgrāhakeṇa śrīvañcimahīmahendra śrīrāmavarmamahārājadattaprabandhasāgarābhidhānena śrīnīlakaṇṭhadīkṣitena"[9].

Scholars like Ulloor, Vatakkumkur and Dr.S. Venkitasubramonia Iyer are also of the same view.[10] Also the Colophon given in 'Appayyadīkṣitavamṣāvalī' of Vīrarāghavakavi clearly stands testimony to this –

yo'ppātanūjaḥ kathito'tha vidvānayyāmakhīti prathitāpadānaḥ yo varṇanāsārasangrahakṛt pratito'yam vai prabandhāmbhu-nidhim."[11]

While referring to the author of Nalacarita, Dr. Kunjunni Raja states Nīlakaṇta Dīkṣita is the brother of Appayya Dīkṣita. Thus the author of Nalacarita and the authors of Ānyāpadeśaśataka might be one and the same. However in the case of Varṇanāsārasaṅgraha it is stated that its author Nīlakaṇṭha Dīkṣita is the son of Appayya

---

9 Op.cit, pp. 179-80.

10 Kerala Sanskrit Literature – A Bibliography, p. 55.

11 Kerala Sāhitya Caritram IV, p. 494.

Dīkṣita II and Kāmākṣī.[12] Hence these two Nīlakaṇṭha Dīkṣitas might be different.

In the colophon given, the date of the work is not mentioned. Ramachandra Iyer states that Anyāpadeśaśataka of Nīlakaṇṭha Dīkṣita is of 17th century A.D.[13] There is another Nīlakaṇṭha Dīkṣita of 16th century who is the author of Ānandasāgarastava and Śivotkarṣamañjarī. The author of Anyāpadeśaśataka has intimate connection with the Travancore Royal family. It is evidenced from the following facts

(1) Svati Thirunal Maharaja has written a commentary called 'Pratipadyam' for this work

(2). At the instance of Ramavarma Maharaja this work was scrutinised by Kerala Varma Valia Koil Thampuran and published in 1886. Nīlakaṇṭha Dīkṣita, the author of Varṇanāsāra-saṅgraha was a protege of Karthika Thirunal Maharaja and belonges to 18th century.[14] Since the period of the author of Anyāpadeśaśataka is 17th century as stated by Ramachandra Iyer and Krishnamacariar the authors of works Anyāpadeśaśataka and Varṇanāsāra-saṅgraha are not one and the same. In short there exists three poets having the same name Nīlakaṇṭha Dīkṣita, one belonging to 16th century, another belonging to 17th century and the third one belonging to 18th century. The author of

---

[12] Op.cit. p. 179

[13] A Short History of Sanskrit Literature, pp. 83, 106, 119 .

[14] Kerala Sanskrit Literature – A Bibliography, p.55.

Anyāpadeśaśataka is the one who lived in the 17th century.

Nīlakaṇṭha Dīkṣita, the author of Anyāpadeśaśataka has many works to his credit. He is the author of Nīlakaṇṭha-vijayacampu, Śivalīlārṇava, Gaṅgāvataraṇa, Kalividambana, Sabhārañjana, Śāntivilāsa and Vairāgyaśataka.[15] He might be the author of Nalacarita also.

The present work Anyāpadeśaśataka has two commentaries. One is Anyāpadeśaśatakavyākhyā by Rajarajavarma Valiya Koil Thampuran. This commentary is for only 40 verses.[16] The other commentary is by the name Anyāpadeśaśatakaślokāvataraṇikā by Svati Thirunal Ramavarma Maharaja named as 'Pratipadyam'. This work is the introduction to each one of the ślokas in Anyāpadeśaśataka of Nīlakaṇṭha Dīkṣita. This commentary was published along with the original and its translation into Malayalam by Kerala Varma Valia Koil Thampuran. A Malayalam commentary was published by M. Rajarajavarma of Kottayam.[17]

The following manuscripts of ORI & Mss. Library are used for preparing this edition.

---

[15] Kerala Sāhitya Caritram, IV, p.23,
Keralīya Samskṛta Sāhitya Caritram, IV, p.396,
Carcayum Pūraṇavum, II, p.15.

[16] Kerala Sāhitya Caritram, IV, pp.13, 17, 468.
Kerala Sanskrit Literature – A Bibliography, p.143.

[17] Ibid.

1. 20680 (क)

This is a palm-leaf manuscript written in Malayalam script. The number of folios is 47. There are on the average 8 lines per page and 9 letters per line. The number of granthas is 160. The size of the folios is 18 cms x 4 cms. The work is complete and the manuscript is in good condition.

2. 2449-A (ख)

It is a palm-leaf manuscript written in Grantha characters. The number of folios is 16. There are 5 lines per page and 42 letters per line approximately. The number of granthas is 300 and the size of the folio is 34 cms x 3.5 cms. The work is complete and manuscript is in good condition and legible.

3. 4485 – A(ग)

This is a paper manuscript written in Devanāgarī script. The number of granthas is 160. The work begins only from 59th verse. The available papers are in good condition.

4. 2954- K and 3511 – B

There are two more palm-leaf manuscripts with the numbers 2954-K and 3511-B in Grantha characters. These two manuscripts are in a dilapidated condition and these manuscripts could not be utilised for this edition.

As a poet Nīlakaṇṭha Dīkṣita has acquired muc popularity and his works are well appreciated by scholar The verses found in Anyāpadeśaśataka stand testimony his poetic talent. He is gifted with good imagination ar the imageries used in the work are exemplary. Hope th publication of this work will be of much use to the studer of Sanskrit literature.

। अन्यापदेशशतकम् ।

छायावृक्षमुपाश्रयन्ति पथिषु श्रान्ता हि पान्थस्समं
तष्वेकोऽस्य शुभं शुभेन मनसा हृष्यन्ननुध्यायति।
अन्यो हर्तुमपेक्षतेऽस्य विटपानाधारयष्टेः कृते
कश्चिन्निश्चिनुते कवाटफलकं कर्त्तुं तमेव क्षणात्।। १

श्वानस्सन्त्यभितोऽपि दन्तमुकुल व्यावर्त्तनोद्घाटित-
स्वैरोत्तानितविड्वराहपृथुकाः किं तैस्थितैर्वामृतैः।
वस्तव्यं गिरिराजमौलिषु विहर्तव्यं पुनस्स्वेच्छया
हन्तव्याः करिणो मृगेन्द्र इति च प्राप्तव्यमुच्चैर्यशः।। २

किं पुष्णसि मृगान्मगादनकुलात् किं वा [1]परं त्रायसे
त्वद्भाग्येन तथाप्यमी वनभुविस्स्वैरं चरित्वा तृणं।
त्वां राजानमुपासितुं यदि किल श्रद्धां निबध्नन्ति [2]यत्
किं [3]पारिन्द्रगुहागृहादपि विनिर्गन्तुं [4]तवैष श्रमः।। ३

उन्मुच्य स्वजनानुपेक्ष्य तृणवत् प्राणानपि प्रेयस-
स्तीर्त्त्वा दुस्तरमर्णवं च वणिजः प्राप्ताः [5]पटीराशया।
श्वासैस्ते विनिवर्त्तिताः प्रतिभयैस्स्वस्थो [6]भवातः परं
त्वं वा केवलमङ्गमङ्गमुरग व्यालिम्प गन्धद्रवैः।। ४

---

[1] परित्रायसे - ख
[2] तत् - ख
[3] हे सिंह -
[4] तवाद्य -ख
[5] चन्दनाशया -
[6] भवान्तः - ख

भ्रान्त्वा दिग्वलभीर्विचित्य विपिनान्यासाद्य दैवादिह
क्वापि क्वापि मुखेन केवलमथैकैकां शलाकां हरन्।
कृत्वा नीडकुटीं चिरात्तरुशिरस्यध्यास्त यावन्नतां
काकस्तावदहो तदेव विपिनं दग्धं दवज्वालया ।। ५

नाम्भोजाय शशी न चापि शशिने यद्रोचतेऽम्भोरुहं
किं तेन क्षतमस्ति किञ्चन जगत्येतस्य वा तस्य वा।
लोकानन्दकयोःपरन्त्विह तयोः प्रेम्णैव भाव्यं मिथ-
स्तच्चेनाजनि तत् प्ररूढमयशस्स्फारं विधेः केवलम्।। ६

अस्तप्रत्युपकारगन्ध[7]मकृतस्वप्रार्थनापेक्षम-
प्यम्भोभिर्भुवमार्द्रयन्ति जलदा जीवन्त्यमी जन्तवः।
दैवज्ञःपुनरस्ति वृष्टिरिति वाणेका मयोक्तेति य-
द्विश्वंक्रीतमिवाधिगच्छति तदेवाघूर्णते मर्मणि।। ७

अस्ति स्वादुफलं किमस्ति किमथाघ्रातुं क्षमः कोरक-
स्तद्विश्राम्य तु नाम भोक्तुमुचितं पत्रं किमस्त्यन्ततः।
सेव्यो हन्त यदीदृशोऽपि मनुजैर्वृक्षाधमः पित्पलो
दुस्स्वातन्त्र्यमिदं विधेः [8]कथय तत् कस्यग्रतो रुद्यताम्।। ८

सर्वासां सरितां पतिर्यदि[9] यदि व्याप्तस्समस्ता दिशः
कल्पान्तेब्वपि वा न शुष्यति यदि स्वैरं तदङ्गीकृतं।
अम्भस्स्वादु पिपासतः पथि परिश्रान्तस्य पान्थास्य किं
तेन स्यात् फलमर्णवोऽयमिति चेदिन्दुग्रहे स्नास्यते।। ९

---

[7] मसकृत् - ख
[8] कथयतो - ख
[9] खलू - ख

स्थित्वा [१०]तीरभुवि प्रसार्य सरसि स्वैरं कराग्रं पयः
पातव्यं पिब तावता न विरमेद्दन्तीन्द्र किं ते तृषा।
उन्मृद्नासि तटीरपः कलुषयस्युन्मूलयस्यब्जिनीं
हानिः कस्य तवैव मृग्यमुदकं भ्रातः [११]पुनस्तृष्यतः ।। १०

को दोषः परितो गते मधुकरे क्रीतः किमेष त्वया
क्रीतेनापि किमास्यते [१२]क्वचिदपि ग्लानोदरेण क्षणं।
जानास्येवमथापि चेत् क्षिपतितं कर्णानिलैर्दूरतो
दुर्धर्षोऽसि निरङ्कुशोऽसि भवतो मत्तेभ वार्तैव का ।। ११

नेतव्यस्समयः कियानिह सखे काकत्वया भ्राम्यता
हंसीभूय सुखेन भुङ्क्ष्व नलिनीनालानि पद्माकरे।
[१३]व्यावर्त्तव्यमिहास्ति किं विमलता किञ्चित्तु कार्यातनो-
र्हंसत्वे यदि ते जनो विवदते दण्ड्योऽहमस्म्यग्रत : ।। १२

किं त्वं दोहदमीहसे किमुदकैस्सिक्तोऽसि किं केनचित्
बद्धस्ते सकृदालवालवलयः किं ते मही संस्कृता।
द्विस्त्रिः पुष्प्यासि [१४]वासरेह्यनुगुणं [१५]धुस्तूरतो निह्नवे
दुर्गन्धो न भवेदियान्यदि ततस्त्वं पारिजातोऽसि नः।। १३

गन्तव्यं जलमध्य एव गतवन्मन्तव्यमेतद्वपुः
क्षन्तव्या लवणानिला इति कृतं निर्विद्य [१६]सांयात्रिक।

---

[10] स्वैर - ख
[11] स्तृष्यति - ख
[12] क्वचिदिह - ख
[13] व्यावृत्त - ख
[14] वासरस्यनुगुणान् - ख
[15] धूर्धूरतो - ख
[16] यात्रिका - ख

अन्तर्वेश्मनि हंसतूलशयने सुप्त्वा सुखं जाग्रतो
हस्ताग्रे धनमेष्यति स्वयमिति भ्रातः किमास्ते हृदि।। १

आसीनस्सुखमापणे यदि वणिक् श्रद्धालुभिः प्रार्थितः
किञ्चिच्छंसति पञ्चकं शतकमित्येतन्न तस्याद्भुतम्।
आपातालविघूर्णिताम्भसि चलत्यौत्पातिके मारुते
मज्जन्त्यामपि ना विमुञ्चति न यस्तामेवमूल्यस्थितिम्।। १

विद्धं मर्मसु येन येन गरलोन्मिश्रा गिरश्श्राविताः
जज्वाल ज्वलनास्त्रवन्निशिनिशि क्रूरैः करैर्यस्सदा।
सर्वेते सुहृदो बभूवुरधुनासङ्गे मियः कामिनो-
दौर्ज्यन्यस्य विभावनात् परिणतौ दूती परं दूषिता।। १

सन्नद्धेषु पयोधरेषु चलिते मन्दं पुरो मारुते
कादम्बे [17]कमलाकरस्थितिमपि त्यक्त्वा सरः प्रस्थिते
मिथ्यारोपितपौरुषैर्मधुकरैर्मुग्धैर्यदध्यासितं
तस्येदं फलमम्भसा प्रवहता सैवाब्जिनीमज्जिता ।। १

सन्त्यक्ता यदि केतकी [18]त्रिभुवने श्लाघ्यापुरद्रोहिणा
तस्मिन्नेव हि पर्यवस्यति ततो वस्तुष्वसारज्ञता।
किं वेणीषु न तां वहन्ति सुदृशः किं सा न विक्रीयते
किं नेमामुपलालयन्ति रसिकाः क्षोणीभुजौ मौलिभिः।। १

कोणे क्वाप्यवतीर्य गात्रमभितस्सिक्त्वा पयश्शीकरै-
रास्वाद्योदकमागतोऽस्मि पुनरित्यास्ते गजस्याशये।

---

[17] भानिभिरपि - ख
[18] त्रिभुवन - क, ख

कासारस्य दशात्वसौ कलुषितान्यम्भांसि मग्नास्तटा
प्रध्वस्ता नलिनी किमत्र बहुना खातव्यमास्ते पुनः।। १९

द्यौरित्थं क्षितिरित्थमित्थमुदधेर्मुद्रेति कृत्वा स्थितिं
विश्वस्याहनि विश्रमाय शयितुं प्रारम्भि धात्रा यदा।
दग्धं चण्डकरैस्तदेव पवनैरौत्पातिकैश्शेषितं
मेघैः प्लावितमद्भुतैरपि जगत् स्रष्टव्यमासीत् पुनः।। २०

स्वस्ति स्वागतमास्यते सुखममी [१९]जाताःकुतः पल्लवा-
स्सन्तस्सत्कुसुमान्यपीह [२०]किमतो माध्वी च तत्रेक्ष्यते।
किं भृङ्गा अपि सन्ति साधु शिरसि न्यस्तं पदं शाखिनां
[२१]धुस्तूरास्ति न दुर्लभं किमपि ते यावद् वसन्तस्सुखी।। २१

दृष्टाश्चन्द्र समुद्गमाश्शतमतिक्रान्ताश्शतं प्रावृष-
स्सीमामेष न जात्वलङ्धत किलेत्यब्धिर्न विश्वस्यतां।
योऽसौ शेत इवायमेव विधिना वामेन चेश्चाल्यते
का सीमेति तदास्ति के जनपदाः का मेदीनी का दिशः।। २२

सर्वत्र स्रवतोऽस्य किञ्चिदुदकं दिष्ट्या मुहूर्त्ते क्वचि
च्छुक्तीनामुदरेषु मौक्तिकमभूत् [२२]काले कदाचित् [२३]किल
[२४]अद्यत्वे च तथा करोतु पटुता यद्यस्ति तद्दूरत-
श्शुष्कैरेव तु गर्जितैर्व्यथयति श्रोत्राणि धाराधरः ।। २३

---

[19] जातः - ख
[20] किमितो - ख
[21] धुर्धूरास्ति - ख
[22] कल्पे - ख
[23] किले - ख
[24] अद्यत्वेऽपि - ख

आयुस्ते कियदस्ति तत्र च कियत्तारुण्यमत्रापि वा-
प्यर्द्धं निर्गलितं निशात्मकतया यत्रास्ति [२५]सङ्गो न ते।
शेषास्सन्ति कतिक्षणाःप्रणयजस्तत्रापि कोपो यदि
व्यर्त्थं निश्चिनु चक्रवाकि जननं कस्ते हितं वक्ष्यति।। २४

सर्वेषां [२६]विदितास्सुधाकरकरास्साक्षात् सुधारूपिण-
स्सन्देहोऽपि न तद्भुजस्सुमनसो जाता न मर्त्यो इति।
तानेव ह्युपभुञ्जते प्रतिनिशं दीनाश्चकोरा इमे
क्षीयन्ते तृणवच्च को नु गहनां जानातु धातुर्गतिम्।। २५

अर्च्चामस्ससततं गणाधिपमथाप्याखून्निहन्मश्शतं
ध्यायामो हृदि भैरवं तदपि तु प्रोत्सारयामश्शुनः
भूतेशं प्रणुमस्तथापि शतशो भूतानिगृह्णीमहे
न ह्येकस्य गुणः परस्य महतो दोषानपि प्रोर्णुते।। २६

अम्बुक्षोभकृतः कतीह तिमयः कत्युच्छ्रिताः पर्वताः
कीदृक् चान्तरबिन्धनो हुतुवहः कीदृक् च नौकागतिः।
आगच्छत् प्रतिगच्छदुच्चलदुपश्लिष्यत् [२७]प्रधावत् पतत्
कल्लोलारभटीभिरेव जलधेस्सर्वं तदाच्छाद्यते।। २६

जामाता कमलाक्ष एव गृहीणी गङ्गा जगत्पावनी
शीतांशुप्रमुखास्सुता भगवती श्रीरेव कन्या स्वयं।
ईदृक् ते गृहमेधिता त्रिभुवनाधारस्य [२८]वारान्निधेः
कश्शक्नोति जनो मनोरथपथेऽप्येतावदुत्प्रेक्षितुम्।। २८

---

[25] सङ्गे - ख
[26] विविधा - क
[27] प्रधावत्यत PE
[28] वा सन्निधे - क, ग

यन्मूले निखिलागमानुपदिशं तत्त्वं परं [29]शङ्करो
यत्पर्णे जगतां निधिस्सतु वटो [30]नाम्नापि न स्वीकृतः
[31]यच्छाखानिचयः [32]पिशाचनिलयो यन्मूलगाः पन्नगा-
स्तस्याश्वत्थतरोः पुनः कति नमस्कारः कति प्रार्थनाः।। २९

आगच्छन्त्यवकुण्ठयन्त्यथ पुनः पश्यन्ति जिघ्रन्ति च
स्वारब्धं मधुमक्षिकां न कणमप्यस्य स्वयं भुञ्जते।
धन्यस्त्यन्य उपेत्य [33]निर्भयममूरुत्सारय[34]यन्दूरत-
स्स्वादं स्वादमिदं स्वसम्भृतमिव [35]स्वच्छन्दमानन्दति।। ३०

आसन्नो मधुरागतं वनभुवस्साम्राज्यमित्यद्भुताः
श्रूयन्ते गिर [36]एष तत्वमिह न ज्ञातुं विधातुः क्षमः।
यत्पर्णैस्त्रुटितं यदप्युपरतं पुष्पोद्गमैश्शाखिनां
यद् ग्लानं विटपैरिदं पुनरिह प्रत्यक्षमालक्ष्यते।। ३२

उत्सन्नो मधुरस्ति कोकिलरवैरुत्सन्नमस्त्येतद-
प्युत्सन्नं मलयानिलैरिदमपि प्रागेव जानीमहे।
पान्थास्तुष्यथ तावतैव किमिति भ्रान्ता यदि प्राणिति-
स्तोकेनापि मनोभवो विगलतु प्राणेषु शुष्को ग्रहः।। ३२

---

[29] शङ्कर - ख
[30] नामपि - ख
[31] निलय - ख
[32] निचयो - ख
[33] निर्दय - ख
[34] दूरतो - ख
[35] स्वाच्छाद्य - ख
आच्छादयति PE
[36] इव - क

तिक्तास्ते विटपास्त्वचो यदि ततोऽप्यासंस्ततोऽपि च्छदा-
स्तेभ्योऽपि प्रसवास्ततोऽपि च फलान्येवं न दृष्टं क्वचित्।
स्तौमि त्वामथवा न निम्ब भवतोऽप्यासीद्यतस्सम्भवः
श्रीमत्तत्किल निम्बबीजमधुना स्तुत्यं [३७]वचश्शलिनाम्।। ३३

चूताः पल्लवमुद्गिरन्ति वितरन्त्येतत् पिकेभ्यस्तत-
स्तेप्येतेन कुहूः कुहूरिति कलं कुर्वन्ति कूजामिति।
निम्बोऽपि स्वयमुद्गिरन् फलमनेनाराधयन्वायसान्
किञ्चित्तेषु ततो रटत्सु [३८]सफलं जन्म [३९]स्वयं मन्यते।। ३४

भोज्यं स्वादु पयस्थितं मणिगणैरापिञ्जरे पञ्जरे
दूरे चिन्तयितुं च दंशमशकाः पारे गिरां लालनम्।
सत्यं सर्वमथपि काननभुवि स्वाच्छन्द्यमव्याहतं
ध्यायन्ती विमना [४०]मनागपि शुकी नालम्बते निर्वृतिम्।। ३५

प्राङ्मेधैः कियदम्बु पीतमुदधेः पीतेऽपि वृष्टिः क्वचि-
द्वृष्टेश्चापि कियत् प्रलीनमवनौ पीतं कियत् प्राणिभीः।
नेदं कश्चन वेदयत्तु किमपि प्रापावशिष्टं पुन-
र्घर्मान्ते सरितां मुखेन तदभूदीर्ष्यास्पदं पश्यताम्।। ३६

मेघं द्वारतया विधाय भुवनान्याप्लावयस्यम्भसा
चन्द्रं द्वारतया विधाय सवितः पुष्णासि सर्वौषधीः।

---

37 शाखिनाम् - ख
38 सुफलं - क
39 स्वकं - क, ख
40 मनागिव - क, ख

यत्त्वीषत्तपसीव तत्तु कुरुषे स्वेनैव तेनाधुना
दातृत्वं घनचन्द्रयोः परिणतं क्रौर्यं तु शिष्टं त्वयि।। ३७

द्वारं न प्रजहातु जातु नियतं जागर्त्तु रात्रीरपि
स्वल्पेनापि मुदं प्रयातु किमतश्शश्वैवतावानपि।
सम्पाद्यो महता धनेन सततं भोज्यश्च सान्त्वैरिति
त्यक्त्वा मत्तगजं पदेस्य महतस्थाप्यः किमेतावता ।। ३८

उत्पन्नास्सरितां ह्रदेषु सुचिरं तत्रैव पुष्टास्ततः
प्राप्ताः प्रावृषि सागरं जलचरास्तासां मुखादेव ये ।
द्वित्रैरेव दिनैस्तिमिङ्गिलकुलस्यासाद्य कूटस्थतां
मृष्यन्त्यद्य न ते रहस्यपि कृतां नादेयतासं कथाम् ।। ३९

पान्थाः कर्दमितः पयः कलुषितं हंसाः कृता दूरतः
पीड्यन्ते च यदेवमर्थिन इति क्रूरारवैश्चातकाः[४१] ।
सोदाहे तव हे पयोद सकलं शक्नोषि दातुं स्वतः
किन्त्वं शीकरमेकमप्युदधिना लोभो यदि स्वीकृतः ।। ४०

सर्वज्ञो यदि शङ्करो यदि महादेवो यदि प्रायशो
देवानामपि दैवतं यदि तदप्यास्तामिदं दूरतः ।
[४२]धुस्तूरैः फणिभिः कपालवलयैरन्यैश्च ते सङ्गति
श्चूडा चन्द्रकले न तावदुचिता याचे बहिर्गम्यताम् ।। ४१

अस्यां प्रावृषि चातकैर्जलकणा लब्धा न चेत् किं ततो
भाविप्रावृषि दास्यते द्विदुणमित्यभ्र त्वया गम्यते ।

---

[41] चातकै - ख
[42] धुदर्धूरै ख

एतेऽद्यैव लयं व्रजन्ति पृथुकैरेतत् [४३]कुलीनो न चे-
देकः प्राणिति [४४]तावतैव कृतमस्त्यत्रैव नस्संशयः ।। ४२

वर्णस्तेऽतिमनोरमश्शिरसि ते वासो मृडनीपतेः
प्रत्येतव्यतरञ्च काञ्चनमिति प्रौढं पुनर्नाम ते ।
किं कर्त्तव्यमितः परञ्च [४५]भवता [४६]धुस्तूर लोका पुनः
न क्रिणन्ति न च शृशन्ति न च वा पश्यन्ति गन्धप्रियाः ।। ४३

राज्यं येन कृतं न तस्य शृणुमः कामस्य नामाऽधुना
येषामेव गिरः पुरा [४७]परभतैस्तैरद्य मौनं धृतं ।
व्याप्ता येन [४८]दिशो न सान्प्रतमसौ [४९]मन्दालिलस्स्यन्दते
किं ब्रूमो नितरां निदाघहतको विश्वं नवं निर्ममे ।। ४४

पीयन्तां तमसा दिशो विदधनां नीचाः पिशाचास्स्वयं
व्याक्रोशन्तु शिवा कियच्चिरमसौ कालस्सरवे स्यास्यति ।
अद्योदेष्यति भानुरेष्यति [५०]दिशामद्यप्रसादोन्मुखे-
ष्वद्य स्वां प्रकृतिं गमिष्यति मही कोक त्वया क्षम्यताम् ।। ४५

मेघा इत्यपतीर्य केऽपि नभसस्सर्वं पयो गृह्णते
यादांसीति समागतास्तत इतोऽप्यन्ये रमन्ते सुखं ।
यस्तुस्वान्तिक एव तस्य महतस्तालस्य कालाद्वहो-
श्शुष्कस्यापि हि नोपयोगकणिकां पश्यामि तेनाब्धिना ।। ४६

---

[43] कुलीनोऽपि - क, ख
[44] तावदेतदल - ख
[45] भवतो - क
[46] धुदर्धूर - ख
[47] भृतां - ख
[48] दृशो - क
[49] स्पन्दते - क
[50] दशा - क

आक्रामन्तु तमेव चूतमपि च क्रोशन्तु रेफोत्तरं
डिम्भोऽस्माकमपीति[51] वाभिदधतां काका वराकास्स्वयं ।
गन्तव्यं क्व [52]ततोऽन्यतः [53]परभृतक्षन्तव्यमेतावद -
प्यग्रेकस्य निवेद्यतामिदमतिक्रान्तो वसन्तोऽधुना ।। ४७

गन्तव्यं शिशिरेण नाम भवितव्यं नाम चूताङ्कुरै-
स्तानास्वाद्य पिकः करिष्यति तदा नाम [54]स्वयं पञ्चमं ।
आस्तामेष तथाविधस्त्वमसि किं काक स्वतन्त्रस्य ते
कालोऽयं स्वर एष भोज्यमिदमित्येषा कुतो यन्त्रणा ।। ४८

काकामूर्ध्नि सुखं वसन्ति शतशश्शखासु शाखामृगा -
घूकाः कोटरगह्वरेषु मशकैर्दंशैश्च सान्द्रं[55] तलं ।
आधारः कियतामसि स्थिरतरं शुद्धं च लब्धं यश
पान्था नोपसरन्ति चेत् क्षतमितः किं वृक्षराजस्य ते ।। ४९

स्निग्धश्यामलकोमलं दलमतिप्रच्छायशीतं तलं
भूपर्यन्तविलम्बिजम्भलफलस्थूलं च वृत्तं फलं ।
सम्पश्यन्विजने वने व्यवसितस्तत्रैव वस्तुं सुखं
[56]पान्थः पान्थमुखाद्विष द्रुममम‌ुं दैवादवेन्य द्रुतः । ५०

वर्षन्त्यम्बुमुस्तपन्तु तपना मथ्नन्तु देवासुरा
बध्नन्तु प्लवगाः पतन्तु सरितो गङ्गदिमास्सर्वतः ।

---

[51] मसीति - क, ख
[52] गतेऽन्यतः - ख
[53] भृतो - ख
[54] स्वरं - ख
[55] दलम् - ख
[56] पान्थाः- ख

पुष्णातूत्पलबान्धवः प्रतिनिशमुष्णातु वा बाडबो -
[५७]नाब्धिः क्षुभ्यति न प्रसीदति ततो न क्षीयते नैधते ।। ५१

वापीकूपतटागपल्वलसरस्रोतस्विनीसारणी-
तोयाभ्युद्गम निर्ज्झरह्रदजलाधारोदपानप्रपाः ।
सम्पन्ना उपजीव्य यस्य विभवं साक्षात् [५८]प्रणाल्योऽपि वा
तस्मैज्जीवनजीवनाय सरितामीशाय तुभ्यं नमः ।। ५२

न ह्युष्णो न च शीतलो जलनिधिर्लब्धप्रतिष्ठोऽपि सन्
कस्त्वस्याः प्रकृतेरमुं चलयितुं शक्तस्त्रिलोकेष्वपि ।
अद्यापि जलतान्तरेव विहितं किं तावदौर्वाग्निना
सायं सायमुदित्वरेण शशिना तत्रैव वा किं कृतम् ।। ५३

राजा विप्रकुलस्य यस्य [५९] तनयस्सोमस्सवारान्निधे -
र्यस्सर्वाश्रयणीय पादकमलस्तस्याश्रयोऽयं हरेः
आनीतश्चुलुकं स एव चुलुकेऽप्यन्तः [६०]प्रवेश्येत चेत्
कस्संवेदितुमीहते भगवतः कालस्य[६१] लीलायितम् ।। ५४

दुग्धं स्वादुरसादपी [६२] हमधुनो दग्धं विषैर्वासुके-
[६३]स्सर्वत्र व्रतसाक्षिणो जलचरा मन्थाद्रिणा मारिताः ।
प्राणेभ्योऽप्यधिकास्सुरद्रुममुखाः प्राप्तास्समस्ता व्ययं
किञ्चिद्रक्षितुमिच्छतामृतमिह[६४] क्षीराब्धिना नाशितम् ।। ५५

---

57 नाम्बु - ख
58 प्रणालयाऽपि - ख
59 स्य - ख
60 प्रविश्ये ख, प्रवेश्येते - क
61 स्स - ख
62 पि हत सुधां दुग्धे - ख
63 संवर्त - ख, PE
64 मियत् - ख

लब्धाश्रीर्मुरवैरिणा पुरभिदा लब्धस्स्वयं चन्द्रमा
देवैरप्सरसो मणिद्विपहयास्तत् स्वामिनैवाहृताः ।
एकस्मै स्वयमेकमेव वितरप्येतेषु चेत् सागर -
स्त्रैलोक्यं वशयेज्जडस्तु स वृथा विक्रम्य [६५]तेर्लुण्ठितः ।। ५६

कत्यश्वाः कति धेनवः कति गजाः कत्यद्भुताः पादपा -
[६६]स्सुन्दर्यः कति [६७]सुभ्रुवः कति [६८]महारत्नान्यनर्घाण्यपि
जातैका किल कन्यका जलनिधेर्दातुं प्रसक्ता यदा
सर्वं तव्द्ययितं तदा परिणतौ नाभैकमुच्छेषितम् ।। ५७

प्रागभ्यागतया किलाभ्रसरिता संप्लावयन्त्यामही-
मम्बोधिस्स्वयमप्यपूर्यत सकृत्तत्ज्जलाधारवत् ।
आस्तेऽयं कथमक्षयो निधिरपां ते ते कथं वासते
निर्व्याजाम्बुधराम्बुदानसुकृतं सिद्धं तदित्थं पुनः ।। ५८

खातं शीतलवारिवारिदकुलश्यामाभिरामद्रुमं
पान्थश्रान्तिहरं सरः पथिहृतं दुर्भिक्षमप्यम्भसां।
ये त्वेते भुवि चातका इति कदाप्यज्ञात भौमोदका-
स्ते गृह्णन्ति नचेदिहाम्बु किमतो दैवेन ते वञ्चिताः ।। ४१

भूमिष्ठा अतिपावनीस्सुरभिलास्स्वाद्वीरपस्सन्त्यज -
न्याचत्यम्बुदमन्बु चातकगणो [६९]यत्नेन किं साध्यते।

---

[65] लूण्ठिभि - ख
[66] सुन्दर्याः - ख
[67] सुभ्रुयः - ख
[68] रहो - ख
[69] यत्तेन - ग, PE

किं तस्मै द्विगुणं प्रवर्षति घनः किं वा तपस्साध्यते
प्राग्जन्मन्यवितीर्णवारिकणिकः पापी स [70]इत्यूह्यते।। ६०

स्वादून्येव फलानि सन्ति सुरभीण्येव प्रसूनानि च
स्वान्तं चाप्युपकर्तुमर्हति जने साध्यं वनस्थेन किं।
भाग्यं हयेतदतर्कितं वनतरोः पान्थो यदा तापस-
छायामस्य यदृच्छया फलवतीमध्यास्त गन्धोत्तराम्।। ६१

पान्थेषु व्ययितं फलं पथिषु यैर्न्नमौस्सदा पादपै-
र्यैरप्युन्नतमौलिगोपितफलैः कोणे निलीय स्थितं।
दावेन ज्वलता द्वयेऽपि खलु ते निश्शेषितास्साम्प्रतम्
पुण्यं पापमिति स्थितं द्वयमिदं तेषां द्वयानां पृथक् ।। ६२

अध्वन्याः किल मूलगर्त्तमधुनाप्यापूरयन्त्यश्रुभि-
र्व्याक्रोशन्त्य[71]धुना स बान्धवकुलास्सायं मुहूर्त्तं द्विजाः।
इत्थं यावदिमानि बिभ्रति शुचं भूतान्यपि त्वत् कृते
तावत्त्वं न गतोऽसि पादप चिरं कीर्त्यात्मना वर्त्तसे।। ६३

जायन्ते विजने वने क्षितिरुहो यद्यप्यमी दुर्भगा-
स्सर्वेते पटुभिस्तथापि न तथा बोद्धुं क्षमास्तुल्यवत्।
आक्रान्तेष्वपि तेषु केषुचिदतिक्रूरक्रियैश्श्वापदै-
र्गृह्यन्ते कतिचिद्यतश्शमधनैर्ब्रह्मर्षिभिः पावनैः।। ६४

निद्रालस्यशरीरसादवमनान्नद्वेषकासज्वर-
श्वासश्चेति महिक्किकाप्रभृतयो मासेषु मातुर्ध्रुवाः।
जातस्तत्क्षणमेव नश्यतु शतं वर्षाणि वा जीवतु
स्वर्गे वा पितरौ दधातु नरके वा पातयत्वञ्चसा।। ६५

---

[70] इत्युच्यते - ख

[71] धुनापि बन्धवलयाः - ख

निघ्नन्तोऽशनिभिस्तटिद्विलसितैश्चक्षुर्हरन्तो नृणां
विध्यन्तश्च [७२]शिलाशतैः परिचिताः प्रायेण धाराधराः।
वर्षन्तो निभृताश्चिरं च समये दृष्टाश्च केचिद्घना
यैरव्याजपरोपकारनिरतैर्जात्या यशस्स्थापितम्।। ६६

नाक्ष्णोर्गच्छसि गोचरं बहुतिथान्मासान्नभस्ये पुन-
स्सङ्घीभूय समेत्य वर्षसि निरुच्छ्वासं समन्तादपः।
कालं कालमनुव्रजन्मितमिता मुञ्चस्य पश्चेत्ततः
किञ्जीमूत तव प्रणश्यति कियत् प्राणन्त्वतः प्राणिनः ।। ६७

भग्नं भित्तिभिरालयैर्न्निपतितं स्रोतोभिराप्लावितं
विद्ध्वस्तं पशुभिश्च सङ्घश इति क्रोशन्ति वृष्टे त्वया।
त्वय्युद्गृह्णति वारि वारिद जना नश्यन्त्यवश्यं क्षणात्
कीर्त्तिं चिन्तय दुर्ल्लभां [७३]न गणय क्षुद्रान् गुणान्मादृशाम्।। ६८

उत्पत्तिर्मलये समुद्रनिलये पन्थावृतो राक्षसै-
स्तत्रत्यानपि हन्त चन्दनतरूंश्छिन्दन्ति सांयात्रिकाः
वर्तन्ते सविधस्थिताश्च सुखिनः शाकोट[७४]मुख्या द्रुमा-
स्तन्मन्ये कृतिनस्तु ते तरुकुले येनोपयोगक्षमाः।। ६९

[७५]गृह्यन्त्वां करिणः प्रसह्य विनिहन्यन्तां वराहा वृका
भल्लूकाश्च तरक्षवश्च पथिकास्सन्तु त्वया निर्भयाः।
आखून् कङ्कखरान् शशाननिमिषान् कीटान् पतङ्गानपि
ग्राहं ग्राहमहो कियत् प्रकटयस्याखेटके पाटवम्।। ७०

---

[72] शिलालकै - ग
[73] गणय न क्षुद्रान् - ग
[74] मुख्य़द्रुमा - ग, PE
[75] गृह्यन्तां - ग, PE

यादोभिर्बडवाग्निना जलनिधेर्यावत् पयो गृह्यते
किं तावत्युपयुज्यते शततमोऽप्यंशः पयोद त्वया।
सौजन्यं किमिति ब्रवीमि भवतस्सर्वस्वमित्थं त्यजन्
ख्यातः ख्यापयसे पयोधिमपि तं सर्वोपयोगक्षमम्।। ७२

मेघः कश्चिदचेतनः कियदपि स्वीकृत्य सिन्धोः पयः
कीर्तिं तस्य [७६]समुच्चिनोति कियतीं धर्मं कियच्छाश्वतं।
व्रह्मज्ञस्तपसां निधिस्त्रिभुवनख्यातश्च कुम्भोद्भव -
स्सर्वस्वं [७७]विनियुज्य तस्य किमिव श्रेयस्समापादयत्।। ७२

यच्छैलेषु यदर्णवेषु यदपि ग्रामाटवीजाङ्गल-
प्रायासुक्षितिषु क्षिपन्ति बहुशस्तोयं वृथा तोयदाः।
दृष्टिस्तत्र न दीयतां यदि गुणग्राही भवान्यत्पुन-
ग्रामेषूपवनेषु वा सकृदमी वर्षन्ति तद्गृह्यताम्।। ७३

ग्रामेष्वेव सुवृष्टयो विनयवत्स्वेव श्रियः पुष्कला
धीमत्स्वेव कलागमव्यसनिता गोष्वेव दुग्धस्थितिः।
वाग्मिष्वेव विवक्षुतेति च जगत् प्रार्थ्यां व्यवस्थामिमां
किं वेधा विदधे पुरेति शृणुमो रामेऽपि राज्यस्थितिः।। ७४

उन्मीलन्ति कियन्ति वा न कुसुमान्युष्णद्युतेरुद्गमे
तत्त्वेतावति बन्धुरित्यातिसखीत्यदित्यकान्तेति च।
कीर्तिं दत्तवतां त्रिलोकविदितामेवं कवीनामृणं
किं कृत्वेयमपाकरोतु जनुषां कोट्यापि नालीकिनी।। ७५

---

[76] समन्विनो - ग
[77] विनियुज्यं- क

विद्धं साधु न साध्विव प्लुतमिदं रेरे कथं विध्यसी-
त्याख्यातुं रणकौशलं वयमपि प्रौढास्स्थिता दूरतः ।
आक्रामन्रणमेदिनीमपि वहन् खड्गं विकोशं करे
वेत्ति स्वं च परं च यद्यवहितो विक्रान्तिरेषैव नः ।। ७६

अम्भोजेष्वति कोमलेषु विहरन्नन्तर्जले संविश-
न्नज्ञातातप वातवर्पमनयत् कालं चिरं यस्सुखं ।
सोऽद्य प्रावृषि केतकीमधिवसन् भृङ्गः क्षतः कण्टकै-
राविद्धः करकोपलैरभिहतो वातैः कथं वर्त्तते ।। ७७

ब्रूते स्वागतमीक्षते कृशममुं श्रुत्वा कथाः खिद्यते
पक्षास्यामसकृत् प्रमार्ष्टिरचयत्युच्चावचाश्वाशिः ।
उच्छिन्नप्रसवात्तरोरूपगते भृङ्गे क्षुधा ताम्यति
प्रस्तौति भ्रमरस्तु पूर्वजठरो नाहारवार्त्तामपि ।। ७८

ये [७८]मृष्यन्ति सहसिकामपि बकैर्जात्या न हंसास्स्वत-
स्तेष्वेको जरसा विलुप्तगमनस्त्यक्त स्स्वकैः प्रावृषि ।
तानेवानुसरन् बकान् बहुतरं तच्चेष्टितानि स्तुवं
स्तज्जात्यैस्स्पृहयन् कियत् कियदहो जातिर्न्निजा निन्दति ।। ७९

शुद्धिं स्वामनुचिन्त्य मीननिवहैः पूर्णेऽपि पद्माकरे
स्वेनैवोपनतैर्मृणालवलयैर्जीवन्ति हंसाः सुखं ।
ये त्वेते विमलास्ततोऽपि च बका ध्यानैकनिष्ठास्सदा
निर्द्वन्द्वा निभृताश्च बिभ्रति न ते यादोभिरेवोदरम् ।। ८०

यैर्जीवन्ति सितच्छदा न दुरितं कस्यापि यत् सङ्ग्रहे
शेचन्ते न हि ते मृणालवलयाः कस्मै प्रभूता अमी ।

---

[78] मृष्यति ग, PE

अप्यासायमुपोष्य मीनपृथुकैर्युक्त्या महत्यार्जितै -
रेकद्वैरपि तृप्तिमेति परमां हिंसोपलब्धैर्बकः ।। ८१

अस्पृश्योऽस्तुमलीमसोऽस्त्वनियताहारोऽस्त्वतोऽ[७९]प्युद्भटै-
र्दोषैरस्तु परश्शतैः परिवृतः [८०]काकस्ततः का क्षतिः ।
भुङ्क्ते भोज्यमुपस्थितं समुपहूयैव [८१]स्वयं बान्धवा-
न्यस्सीदत् क्षुधया विचिन्तय ततो धन्यश्च पुण्यश्च कः।। ८२

भृत्यास्ते बिभृमस्तु तान्वयमिमे क्षुद्रा बृहन्तो वयं
जातौ पक्षवताममी तु कलकण्ठाः कालकण्ठा वयं।
इत्युद्भावयसे कुहूमुखकुलादुत्कर्षमेवात्मनः
कण्ठे पातयिता कदा खलु भवान् काक स्वरं पञ्चमम्।। ८३

केनाध्यापितमास्थितं क्वनु कदाधीतं क्व वा वर्तितं
तद्विश्राम्यतु कुत्र जातमथ कैः पुष्टं तदालोच्यतां।
कालेसोऽपि कुहूमुखो यदि जगत् कर्णामृतं कूजति
प्राग्जन्मार्जित भाग्यवैभवमिदं कस्स्तोतुमीष्टे कविः।। ८

कीटः कश्चन वृश्चिकः कियदयं [८२]प्राणी कियञ्चेष्टते
को भारो हननेऽस्य जीवति स वा कालं कियन्तं पुनः।
नाम्नोऽप्यस्य कियद्बिभेति जनता दूरे कियद्धावते
किं ब्रूमो गरलस्य दुर्विषहतां पुच्छाग्रशूकस्पृशः।। ८

---

[79] त्युत्कटै ख, ग.
[80] क्षतः - ग
[81] स्वतो - ग
[82] प्राणीति यद्वेष्ठते - ख

किं चन्द्रो न पुरा बभूव किमिमे वृक्षाः पुरानाऽभवन्
किं [८३]सृष्टा अधुना पिका मधुकरा अद्योदपद्यन्त किं।
साहङ्कारममुं प्रपञ्चमखिलं भोक्तुं यदा प्राणिनां
प्रासीदद्द्रुहिणस्तदा समुदभूदाश्चर्य[८४]वर्यो मधुः।। ८६

आयासानविचिन्तयन्नगणयन् लाभं ततः किञ्चिद-
प्यम्भो मुञ्चति कीर्तिमात्रशरणो धाराधरस्सर्वतः
तद्यत्नादुपयुज्य वर्द्धयतु वा दातुर्यशश्शाश्वतं
मौढ्यादेतदुपेक्ष्य नाशयतु वा लोकः प्रमाणं ततः।। ८७

वृत्तिं वर्तयितुं निजां विषहरा गृह्णन्तु [८५]सर्वान्नरा
गृह्णन्तु क्षुधितास्तदेकविहिताहारा मयूराश्च वा।
नाजिघ्रान्ति च ये कदापि नकुलास्ते हन्त किं कारणं
दर्शं दर्शमनुद्रवन्ति भुजगान्द्वेधा च विच्छिन्दते।। ८८

खादन्ति क्षुधितास्तृणानि तृषिता[८६] गृह्णन्त्यपो निर्झरे
सीदन्तो गिरिकन्दरासु हरिणा येऽमी क्वचिच्छेरते।
व्याधव्याघ्रदवानलप्रभृतयस्तेष्वेव सन्नाहिन-
स्तद्वा तिष्ठतु घातयन्ति मुनयोऽप्येतान् कथं [८७]चर्मणि।। ८९

घ्नन्त्येकत्र तरक्षवो मृगकुलं दावा दहन्त्यन्यतो
व्याधा वीतभयाः परत्र शतशो विध्यान्ति गृह्णन्ति च।
किं त्वं वेत्सि कथामिमां मृगपते निद्रासि कोणे क्वचि-
द्दिष्ट्या चेदवबुध्यसे शमयसि द्वित्रान्वृथा दन्तिनः।। ९०

---

[83] सष्टो - क
[84] चर्यो - PE
[85] सर्पा - क
[86] गृह्णत्यपो - क
[87] चर्मणे - क

दुर्धर्षोऽसि वनेचरोऽसि क इदं नेत्याह किन्तु स्वतो
जानीषे न हिताहितं न खलु तज्जिज्ञाससे वाऽन्यतः।
तद्गृह्णन्ति नियन्त्रयन्ति निगलैस्त्वां ताडयन्त्यङ्कुशै-
रारोहन्ति च वारणेन्द्र मशकप्राया मनुष्या अपि ।। ९१

अह्नस्त्रिश्चतुरम्बुभिस्स्नपयसि स्वं पुष्करावर्जितै-
र्भुङ्क्षे मेध्यतराणि भद्र तरुणान्यश्वत्थपत्राणि च।
पुण्यारण्यचरोऽसि न प्रविशसि ग्रामं सकृत् कुञ्जर
ज्ञानं चेत् कियदप्युदेति न समा ब्रह्मर्षयोऽपि त्वया।। ९२

हन्यन्ते कति जन्तवो [88]वनचरैर्नित्यं कति श्वापदै-
र्गृह्यन्ते कति कूटयन्त्ररचनैः क्षोणीभृतां प्रीतये।
एतावत्यपि विप्लवे न भजसे कस्यापि दृग्गोचरं
स्वच्छन्दश्च सृगालखेलसि पुनस्तुल्यं वनग्रामयोः।। ९३

अस्ति स्वर्णमयोऽद्रिरस्तिविषयः क्षुत्तृङ्भरावर्जित-
स्सन्ति क्षीरघृताकरा जलधयस्सन्ति द्रुमाः कामदाः।
किन्नस्तच्चरितादद्भुतश्रवणतस्साध्यं क्षुधा ताम्यतां
दृष्टं यत्सविधे विधेहि सुमते तत्रेव [89]सर्वं श्रमम्।। ९४

अस्त्यत्रैव किलाऽर्णवे तदमृतं तत्रैव हालाहल-
स्सन्त्यस्मि[90]न्मलये पटीरतरवस्तत्रैव वाताशनाः

---

[88] जन - ग

[89] सर्वत्रमः - ग

[90] न्निलये - ग

यद्यद्वस्त्वभिजात[९१]मस्मि [९२]सविधे तत्तदुरापं नृणां
प्राप्तव्यं रसनाञ्चले करतले [९३]फाले च वेधा न्यधात्।। ९५

तावश्चैधितमेधितव्यमवनौ यावन्महद्भिर्द्रुमै-
श्छायाभिः कुसुमैः फलैश्च पथिकाश्शक्त्या समाराधिताः।
[९४]कालोऽयं मम जीर्यतः पतितुमित्यास्ते तरोराशये
पान्थानां च पतत्रिणां च हृदये जातोऽयमस्मिन् क्षणे।। ९६

दृष्टिघ्राणविषान् फणाधरपतीनष्टापि दृष्ट्यास्स्वयं
रोद्धुं द्रावयितुं विनाशयितुमप्यव्याहतप्रक्रमः।
मार्जारान्नकुलांश्च किं खगपतिस्साह्ये वृणोत्यात्मनः
किं प्रत्यर्थिकुलस्य[९५] वृत्तिद इति प्रद्वेष्टि वामारुतम्।। ९७

अध्वन्यान् कति रुन्धते कति दृढान् भिन्दन्ति तोयाकरान्
केदारान् कति मज्ज्यन्ति कति च व्यापाटयन्ति द्रुमान्।
वाहिन्यः क्षणलुप्तवारिविभवा वन्या अवन्यामिमा
यस्सिन्धुस्सकलाश्रयस्सतु पुनः कुत्रेति न ज्ञायते।। ९८

का द्यौः किं बलिसद्म का वसुमती स्यात् सर्वमेतद्यदि
प्रत्यक्षं न भवेत् कदाचिदपि किं ते सर्वसन्दर्शिनः।
भ्राम्यन्तः प्रलपन्तु नाम विदितं मण्डूक सम्यक् त्वया
मुक्त्वेमं परमं कुकूपमितरत् किं नाम सम्भाव्यते।। ९९

---

[91] मस्ति – ग, PE
[92] विविधे – ग
[93] भाले – PE
[94] कालो धर्ममजीर्यतः – ख
[95] प्रार्थिद – ख

त्वद्गर्भे सुखमासत्ते फणिपति श्रीकूर्मदिग्दन्तिनः
प्रत्यक्षा कुलभूभृतां स्थितिरपि त्वय्यम्ब सर्वंसहे।
ये त्वेते बिभृमो वयं भुवमिति स्वं ख्यापयन्ते यशो
निश्शङ्कं निरपत्रपं च तदिदं नः कर्णशूलायते।। १००

भूतानां प्रभवस्थिति प्रविलयास्त्वय्येव विश्वम्भरे
त्वद्गर्भे ननु ते रसातलजुषो दैत्याः फणीन्द्राश्च ये।
त्वं सर्वैरूपजीव्यसे दिविचरैस्त्वत्तोऽपि किञ्चित् परं
न स्यात् स्यादपि तन्निरस्तविषयं ब्रह्म त्वमेवासि नः ।। २०१

हरिः ॐ शुभमस्तु

NṚPAVILĀSA

Editor.R.Girija

In olden days most of the Indian poets wrote panegyric poems on their kingly patrons. Such compositions depict their heroes as the most illustrious and meritorious of all the emporers, living as well as legendary. The present work *Nṛpavilāsa* is also one among the said category eulogising King Keśavarāma.

The author of *Nṛpavilāsa* is Tripāṭhī Śrivarāma. He was a prolific writer. The colophon clearly indicates that Tripāṭhī Śivarāma composed this for the pleasure of King Keśavarāma who was his own brother. Śivarāma was the son of Kṛṣṇarāma and grand-son of Trilokacandra.

According to the 'Aufrecht's Catalogus Catalogorum, Tripāṭhī Śivarāma was the son of Kṛṣṇarāma, and grand-son of Trilokacandra. He was the elder brother of Govindarāma, Mukundarāma and king Keśavarāma. So we have to identify[1] King Keśavarāma as the younger brother of the author. The new[2] Catalogus Catalogorum edited by Dr. Kunjunni Raja also refers Tripāṭhī Śivarāma as the afore-said one. Ten works are attributed to his credit. They are–1 Kāñcanadarpaṇa Vāsavaduttātīkā 2.Kādambarītīkā; 3.Kāvyalakṣmīprakāśa 4. Daśakumāra-caritabhāṣya; 5. Nakṣatramālā and its commentary

---

[1] Sir.The odor Aufrecht – Catalogus Catalogorum. P.652. Leipzig. 1891.

[2] Dr. Kunjunni Raja - The New Catalogus Catalogorum Vol. X. p. 187, University of Madras – 1978.

Lakṣhmīvilāsa; 6. Bhūpālabhūṣaṇa; 7. Rasaratnahār 8. Lakṣmīvilā- sābhidhāna Uṇādi Kośa; 9. Vidyāvilāsa an 10. Viṣamapadī Kāvyaprakāśatīkā. It is also noted th Śivarāma has quoted *'Paribhāṣendu- śekhara'* in Lakṣmīvilāsa. Hence he can be placed in the beginning the 18th century. But in the colophon we get the date 1892 of the Samvat year. The colophon reads as

Trilokacandrātmaja Kṛṣṇarāmasūnustripāṭhī

Śivarāmanāmā

bandhormude Keśavarāmanāmnascakre

nibandham

Nṛpavilāsam

Iti Śrī Śivarāmakṛto Nṛpavilāsaḥ Kārtika vad pratipadāyam taddine Kāśyām likhitam. Samvat 1892.

From this we have the information that the work ha completed in the first day of the light half of the month Kārtika in the Samvat year 1892. The correspondin Christian era AD. 1835. But the date given in th Aufrecht's catalogue of Sir Theodor Aufrecht and th colophon seems differing.

Nṛpavilāsa begins with the traditional style benedictory verses. The whole work is divided into 3 names. After every description a name is given. There a about 167 verses under these 31 names-*āśīḥ, Stutiḥ sabh citrajātiḥ, Saudham, Vāpikā, Jalakrīḍā, veśyā, rati*

Viparītaratiḥ, candrikāvihāra strīanurāga, Vāṭikā, Sāmānyadeśa, Prajā, aśva, gaja, khadga, dhanu, Ketu, Śibikā purassarāśvagajadhūḷi, prasthānam, yuddhā- dhvara, dvandvayuddha, sandhipalāyana, ripupalāyana, yaśas and *raṇabhūmi*. The various aspects and subjects related to the king are illustrated in a very beautiful style. The subjects dealt within itself reveals that the author was a very great scholar in all branches of learning. He was well-versed in poetics also.

This edition is brought out from a single paper manuscript bearing the register No.10040 which is kept in the collection of the ORI & Mss. Library, University of Kerala. It is written in the Devanāgarī script. There are 16 folios, each having seven lines per page and an average of 30 letters per line. The number of granthas is about 190. The manuscript is in good condition.

We are presenting this beautiful piece before the lovers of Sanskrit.

अथ नृपविलासप्रारंभः।

श्रीगणेशाय नमः।।

वृषाकपीशंखहस्तौ शितिचन्द्रांशशोभिनौ।
विनायकयुतौ नागयुतौ स्तावस्सुखप्रदौ।। १

कार्तवीर्ये दशग्रीवे प्रलंबे प्रबलेऽसुरे।
राजन्रामइवारातावेधि शंभुरिवान्धके।। २

कंसे सन्तमसे वृत्रे द्विरदे रदशालिनि
नयज्ञप्राज्ञतत्त्वज्ञभूया हरिरिवारिषु।। ३

दशशतनेत्रसमो नृपेषु भूया
दशशतबाहुपराक्रमश्च जन्ये।
दशशतवक्त्र इवावनिं धर त्वं
दशशतरश्मिसमानभाश्चिरायुः।। ४

दशाशाविस्तृतयशा[1] दशास्यान्तकवत्प्रभो
संख्यावांस्त्वमसंख्याकान् शाधि शत्रून्परन्तप।। ५

---

[1] रामचन्द्रवत्. इत्यपि पाठः।

जीव राजन्कणेहत्यमनोहत्य लभस्व शम्
साक्षात्कृत्य रमाकान्तं प्राध्वंकृत्य खलान्रिपून्।। ६

वाचंयमस्त्वं परपापकीर्तने
दोषेक्षणेमीलितरम्यलोचनः।
पुरन्दरश्रीर्भवतात्परं तपोभूया-
द्भवच्छत्रुगुणः शुनिंधयः ।। ७

नानाविधद्रविणदानविधानदक्षो
लोकोपकारनिरतो रिपुकक्षवह्निः।
कीर्तिं प्रकाशितसमस्तदिगन्तरालो
जीयादिवस्पतिरिवामरसेव्यमानः।। ८

चन्द्रोदये सिन्धुरिवात्र वृद्धिं
वसुन्धरेशाप्नुहि सर्वकालम्।
ध्वान्तं निशान्ते सवितेव सर्वान्
विनाशयस्वप्रतिपक्षिसंघान् ।। ९

महाराजपूर्वाधिराजेति नाम
त्वदीयं सदास्यात्प्रभो जागरूकम्।
समुद्दण्डदोर्दण्डनम्रीकृतद्विड्गण
स्तूयमानं त आशीरियं नः।। १०

श्रीरस्तु ते वित्तपतेरिवोर्व्या-
मकृत्रिमोद्दामपराक्रमस्य।
महेन्द्रपूर्वत्रिदशार्च्यमाना
कृष्णस्य हृन्मानसराजहंसी ।। ११

रसेश्वराणां प्रतिबद्धदोर्भी
राजीभिराज्ञाश्रवणेच्छुभिस्त्वम्।
सिंहासनस्थः परिवेष्टितः स्या
आकाशगोरात्रिकरो यथर्क्षैः ।। १२

सा श्रीस्तवास्त्वर्थपतेरिवोर्व्यां
जिष्णुप्रभावः समवर्तिता च ।
बलाहकैरर्थमुचः समानमा-
चाम सद्भक्त्यमृतं मुरारेः ।। १३

श्रीरस्तु ते मृष्टपभूरिजीव
राजन्गिरा तत्र भवान् सकौंभिः।
जातः पटुः शत्रुनिरोध आदा-
वरेस्त्वदीय श्रुतिरत्र शीर्णौ ।। १४

सुदक्षिणाः सन्तु सवाः कुले ते
मोहादिजालं तव भङ्गमेतु।
जीवैधमानः शरदां शतं त
आशीरियं सत्प्रतिपा (मा)लकस्य।। १५

सदैव यायातु यशो दिगन्ता-
नुव(भ)वालिदन्ताबलसंहतीनाम्।
विश्राणनैरर्थिभिरेव सार्द्धं
ददस्व पादं रिपुमस्तकेषु ।। १६

कलाधिनाथच्छविते दिगन्ते
मरालशुभ्रं च यशः प्रयातु।

समस्तजन्तूपकृतिव्रतेषु
चित्तं रतं नास्ति भवत्सु कस्य ।। १७

द्वारे तवेभा निवसन्तु रथ्याः
पदातिसघाः शिबिकास्तुरंगाः।
ग्रामस्य नेताप्यभिमानशाली
कल्पद्रुमानल्पफलप्रदस्य ।। १८

कर्णाधिकर्णोऽव्ययशोभमानो
दानप्रसंगे भव भूरिभूतिः।
जीयाश्चिरं नाशय शात्रुवृन्द-
मशीतरश्मिस्तिमिरं व लोके ।। १९

इत्याशीः ।।१

प्राह्णेतनस्य तरणेर्दिनमध्यगस्य
सायन्तनस्य च रुचो विविधा भवन्ति।
कालत्रयेऽप्यविकृतद्युतिशालिनस्ते
जातो महान्नृसवितुःसवितुर्विभेदः ।। १

भवांश्चतुः षष्ठिकलानिधि
विधुस्तुताः षोडश सन्दधाति।
भवच्चतुर्थांशगुणः सपूर्णः
साम्यं कथंकारमवाप्नुयात्ते ।। २

सिंहस्त्वदीयमृगयाविषयो नरेन्द्राः।
तस्याप्ययं तु मृगयाविषयो गजेन्द्रः ।

तस्मात्कथं मनुजकुञ्जरकुंजरेण
साम्यं त्वदीयमिह वर्णयितुं क्षमस्याम् ।। ३

अन्तःपुरः प्रियतमाजितमध्यदेशो
मुक्ताविभूषणविनिर्मितये गजेभ्यः ।
निष्काशयन्नपि न समीपमासां
तुल्यः कथं स भवता नरसिंहसिंहः ।। ४

द्विषंतपस्त्वं भुवने प्रसिद्धो
विधुंतुदो यस्य रिपुः प्रसिद्धः ।
नृसोमसोमो वसुधातलेऽस्मिन्
कथं नु ते साम्यमहो लभेत ।। ५

मित्रस्य चामित्रजनस्य संगा-
द्विकासिनोर्हर्षवशाद्रुषा वा ।
भवदृशोर्भूमिपतीशसाम्यं
कथं समासादयता सरोजम् ।। ६

अरुन्तुदं नो वदसि क्रुधापि
वसुन्धरावासवयत्समित्सु ।
जानन्ति तत्र त्वमहो नयज्ञाः
प्रियंवदस्यास्त्यवशंवदः कः ।। ७

भासिकौशिकवद्राजन्मध्येसभमहर्दिवम् ।
यातिकौशिकवच्छत्रुः कान्तारे ते ऽ ह्नि नष्टदृक् ।। ८

जयोश्रियोबन्धनबाहुपाश
द्वयेन भूपानुकृतस्त्वया सः ।

हरित्पतिर्जम्बुक ईर्ष्यया ते
दोषारिणान्योऽनुकृतः स्वरैः सः ॥ ९

निरन्तरध्यानतयामुरारे-
स्त्वंपुंडरीकाक्ष इवाविरासीः।
वनेरिपुर्व्याघ्रभयात्त्वदीयः
सपुंडरीकाक्ष इलाशयोऽभूत् ॥ १०

सर्वदादायको राजन्स्थीत्वमसि विश्रुतः।
सर्वदादायको राजन्नर्थी तेऽरिरपि श्रुतः ॥ ११

लक्ष्मीरारात्त्वदस्तीशलक्ष्मीराराद्रिपोरपि।
द्वयोर्विशेषाभिव्यक्तिःस्फुटा याचकचर्यया ॥ १२

कटकान्तरगामित्वं परस्य चरणोपगः।
बहुभूतिस्तथारिस्ते राजत्वेनभिदा द्वयोः ॥ १३

ज्याकर्षणानुरक्तस्य तथा सानुचरस्य ते।
राजन्विश्वस्तप्रजस्य पराद्भेदः पराद्विधेः ॥ १४

श्रियान्वितो दुःखगणं हरेस्त्वं
स्वसेवकानां श्रितवान् हरित्वम्॥
परस्तु राजन् हृतदारवर्गो
रक्षन्शिशूंस्ते शिशुपालतां च ॥ १५

दुरासदेषु क्षितिभृच्छिरस्सु-
पदांनिधानाद्धरितामितस्त्वम्।
दुरासदेषु क्षितिरुट् शिरस्सु-
पदां निधानाद्धरितामितोऽरिः ॥ १६

विहितापचितिर्लोकैवहुगर्मुन्महाछविः।
हर्षात्त्वदीयाद्रोषाच्च (त?) त्सुहृद्दुर्हृत्तवप्रभो ।। १७

अर्वालीसेव्यमानस्त्वं नागजालोपशोभितः।
राजन्कनकसम्पत्तिः शब्दैररिरपीदृशैः।। १८

राधेयभिन्नोप्यमोघरालिस्त्वं बहुदायकः।
रत्नकोशोप्यकोशस्त्वं समवर्त्यपिनान्तकः ।। १९

विजयार्थमनेकानि कर्माणि चरसि प्रभो।
अरिष्टवारणे दक्षो हरिवन्न जनार्दनः।। २०

तन्त्रशास्त्रविभिन्नोऽपि वित्तो मन्त्रमहोदधिः।
अवैद्यकागमोऽपि त्वं सुश्रुतो वैद्यजीविनः ।। २१

स्वरप्रबन्धान्नोपीश सर्वतोभद्रशोभनः।
तथा समरश्च विज्ञातस्त्वं महीतले।। २२

शत्रुघ्नबन्धुर्धीराग्र्योहितकृल्लक्ष्मणान्वितः।
विभीषणानुगो भासि सांगदोरामचन्द्रवत् ।। २३

भवान्कुवलयानन्दसम्पादनमहायशाः।
अप्पयदीक्षित इव सदालंकार संभृतः।। २४

अत्रिनेत्रोप्यरिपुरांदाहकोद्विजराजयुक्।
शिवान्वितः सर्वदैवभासिभर्ग इवापरः ।। २५

ज्याकर्षणरतत्वं हि विख्यातं त्वद्रिपोश्च ते।
पाणौ वलयबन्धे च किणाच्छौर्यं द्वयोः स्फुटम् ।। २६

अवनीपरिपोः सेयमवनी तव हस्तगा।
अवनीसर्वजन्तूनामवनीकमलेक्षणम् ।। २७

वदान्यांजिह्रियाञ्चक्रुः विभयांचक्रिरे परैः।
द्विजास्तु जुहवांचक्रुर्विभरामासिथावनिम् ।। २८

भग्नभासो भिक्षुभीत्याभुविभूपास्त्वया विना।
ते स्वात्मंभरयः सर्वे भवान्सर्वोदरंभरिः ।। २९

त्वत्पदान्ते निपतिताः पुना राजत्वमागताः ।
पूर्वरूपालंकृतिवद्राजानकेचिनस्थिताः।। ३०

सुहृदामापदांदाता दातासौख्यस्यदुर्हृदाम्।
स्वयशोभिर्दिशांदाता दाता भवभवोर्थिने ।। ३१

पटुर्भवानन्दकृतौ मुक्तावल्याविभूशितः ।
अनधीती तर्कशास्त्रे केनस्तुत्योऽसि भूपते ।। ३२

ज्योतिर्विदाभरणमाह जनोऽत्र कोऽपि त्वां
ज्योतिषागमविभिन्नमपि प्रमादात्।
सर्वात्मना भरणतः सकलस्य जन्तोस्त्वां
वच्यहन्तु सकलाभरणं प्रमोदात् ।। ३३

पुराणैः पूर्वमीमांसा परोदर्के च नीतिभीः ।
त्वत्सभांभासयति हि सभां विद्वत्सभामिव ।। ३४

पराभवोद्भवा चिन्तामणि दीधिति शोभिनः ।
नैयायिकस्येव नते षडभिज्ञरिपोरपि।। ३५

कामतन्त्रइवानंगरंगसंगतिशोभनः।
ततो रतिरहस्येन नारीणामतिरागकृत् ।। ३६

अवदानप्रचारेण समितिं तव भूपते ।
सत्पतन्तुमिव प्राज्ञाः भासयन्ति भयस्तथा ।। ३७

श्रीमद्भोज इव त्वं विरचितसरस्वतीकण्ठाभरणः ।
श्रीहर्षवन्नरपते रत्नावल्या प्रसिद्धिस्ते।। ३८

यवन(ग्रय) थ इव त्वं नरेश शूरपरनलमदनः।
अनवारःशत्रूणामकवरनामा च लोकेऽस्मिन् ।। ३९

।। इति स्तुतिः ।।

प्रायश्चित्तैकसुखदां व्यवहारोपयोगिनीम्।
बहुसंस्कारसहितां समज्यां पृथिवीपते ।। १

मिताक्षरामिव न के धर्मशास्त्र विशारदाः।
सेवन्ते सुखसंपत्यै हेमन्ते वनितामिव ।। २

वृद्धिस्तु नैवास्ति गुणःकदाचिलोपः
क्वचिन्नित्यमनर्थकत्वम्।
विपर्ययस्तेसदसिक्षमेशाभ्यासस्य
शास्त्रादबहुशास्त्रजस्य ।। ३

अभ्यासस्य ह्रस्वता च दैर्घ्यं च तव संसदि।
द्यूतादिजस्यधार्मस्य पाणिनीय इवक्रमात् ।। ४

।। इति सभा।।

कः शीते शीतनामेति ग्रीष्मे सन्तापयन्नपि।
जहार कान्ता रामस्य सर्वविद्रावणोऽसुरः ।। १

स्पर्शवान् रूपहीनःकः किं च प्रश्ने प्रयुज्यते।
जातिः प्रश्नोत्तरेयं तु सरसीरुहलोचन।। २ **(युग्मम्)**

सगुणोनिर्गुणो वापि कः पूज्यो वसुधातले।
समस्तजातिरुक्तेयं राजमान्योऽम्बुजानन ।। ३

देवाधिपः कः कोमायाः पतिर्भानुपतिश्च सः ।
इयमेकोन्तराजातिर्हरिरंभोजलोचन ।। ४

परोः कीदृग्वर्त्म रामः किंकृतःसीसयास्त्रजा।
इयंनामाख्यातजातिरवारिकमलानन! ।। ५

कैलासे को निवसति कपर्द्दकास्यशोभने।
कास्यगन्धगुणामूर्त्तिविषेनेपिसकीदृशः ।। ६

कास्यातिगृह्यानगरीमान्यः कोस्यापि देहिषु।
संहितादिक्रमान्तेयंजाति गंगाधरामरः ।। ७

कशोभायै जीमूतानां भोज्यामृत्युःकास्वःस्त्रस्ता।
वेदृच्छित्कामौगौवृत्तेविद्युन्माला छंदो जातिः।। ८

कापूर्दग्धाहनुमतातस्यास्तंप्राहकंजनः।
व्यत्यासादक्षरस्यैकपदेलंकेति चोत्तरम् ।। ९

कोऽपर्णायाःपतिस्तस्यासपत्नी का पिता च कः।
समस्तव्यस्तयोरुक्तं गंगाधर इति प्रभो! ।। १०

व्यत्यासादक्षरस्यैव कर्म किं भाववाचकम्।
तत्संहि विपर्यस्त प्रश्ने देवमितीरितम् ।। ११

